घृ॰ सूत्रदीपिकाप्रकाशप्रथमाध्यायद्वितीयतृ
तीयपादौ

५२६०

पत्रे ६९

सारस्वदीपका

१९..

प्रथमाध्यायस्यान्तीयपादः शारस्वदीपिका प्रकाशटीका

प्रथमाध्यायस्य
द्वितीयतृतीयपादो

१

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥ ॐ नत्वा गुरून् गणाधीशं वाणीं चाभीष्टसिद्धये । प्राचीनदर्शितदिशार्थं चसे
शास्त्रदीपिकां प्राचीनविस्तृतमाख्यादर्शनाल्लसचेतसां ॥ उपकारायपतोऽपं वाक्यार्थैकप्रकाशने श्रीमन्नापस्याञ्ज
स्मिन्नध्याये कृष्णमाणस्यार्थवादमंत्रस्मृतिनामधेयादिविचारस्य शास्त्रसंगतिं तावद्दर्शयितुं प्राक्स्त्रार्थप्रदर्श
नपरं प्रथमसूत्रार्थं दर्शयति । अथेति । अथ वेदाध्ययनानंतरं अतः पूर्ववृत्ताध्ययनाद्धेतोर्धर्मस्य जिज्ञासा विचारः
कर्तव्य इत्यध्याहारः । ननु कैः प्रकारैर्धर्मो विचार्य इत्यत्राह प्रमाणेति । प्रमाणादिभिश्चतुर्भिः प्रकारैरित्यर्थः । तत्र प्र
माणं श्रुतिस्मृत्यादिरूपं अग्निहोत्रादि साधनं [redacted] प्रयाजादि च [redacted] फलं स्वर्गा
दीति विवेकः । हेयत्वाय धर्मप्रमाणाद्याभासा अपि ज्ञेया इत्याशयेनाह समाभासैरिति । तत्र प्रमाणाभासाः शाक्यागमाद
यः स्वरूपाभासाश्चैत्यवंदनादयः । साधनाभासाश्चैत्यादयः फलाभासास्तदुक्तस्वर्गादयः एवं च प्रतिज्ञातशास्त्रार्थध
र्मप्रमाणविचाररूपत्वादस्य शास्त्रसंगतिरिति भावः । अध्यायार्थवदत्राध्यायसंगतिं दर्शयति । तत्रेत्यादिना । तत्र प्र

दध्याज्यपुरोडाशादि· ४

राम· १

माणादिमध्यदृत्यर्थः। धर्मे किं प्रमाणमिति जिज्ञासायां प्रमाणं निरूप्यत इति योजना। तत्र प्रथमेऽध्याये प्रमाणं वि
चार्यते द्वितीये स्वरूपं षष्ठे फलमितरेषु साधनमर्थात्तद्विपरीताएव तत्तदाभासास्तत्र तत्रैवेति बोध्यं। तेनेति। प्रथ
म सूत्रे प्रमाणसामान्यस्यैव प्रतिज्ञाततत्वेनेत्यर्थः। संगतमेवेत्यन्वयः। ननु चोदनालक्षणोऽर्थो धर्म इति सूत्रे चोद

तदर्थे

नाया एव धर्मप्रमाणत्वप्रतिज्ञानोस्य च तदर्थपुरुषप्रवृत्तिपर्यायार्थभावनारूपभाव्यत्वज्ञानरूपकरणप्राशस्त्या
दिरूपेतिकर्तव्यता। लक्षणं शब्दविशिष्टप्रवर्त्तनारूपलालिङाद्यस्य च स्वर्गादिभाव्य(यागादिकरणप्रयाजादी
तिकर्तव्यतारूपांशत्रयविशिष्टार्थभावनारूपस्यार्थवादार्पितप्राशस्त्य(मंत्रस्मारित(नामावच्छिन्नधात्वर्थयागा
द्यनुरक्तत्वया अर्थवादमंत्रनामधेयानां चोदनान्तर्गतत्वेन तद्विचारस्यात्र संगतत्वेपि स्मृत्यादिविचारस्येह न संगतिरि
त्याशंक्याह नहीति। चोदनेति। चोदनामात्रेत्यर्थः। लक्षणार्थः अध्यायप्रयोजनं। प्रत्यादेरिति। आदिपदेनाचारसा
मर्थ्ययोः संग्रहः। प्रमाणेति। प्रमाणसामान्येत्यर्थः। उक्ते संमतिमाह नदिति। को धर्म इति स्वरूपप्रश्नः कथं लक्षण

कइतिप्रमाणप्रश्नः। इतश्च प्रमाणसामान्यनिरूपणमेवाध्यायार्थ इत्याह सर्वविशिष्टेति। प्रमाणलक्षणं वृत्तमिति सा
दिभाष्यकारस्य व्याहारात् दृष्येव मेवैतच्छाबरेणाहेति समस्तमिति। इतिर्हि तोतथा च चोदनासूत्रे साक्षाद्धर्मे प्रमिति
करणता चोदनायाः प्रामाण्ये प्रतिज्ञाते तन्मूलस्मृत्यादेरप्युपलक्षणतया तत्प्रतिज्ञासिद्धिरिति भावः। प्रमाण
सामान्यस्याध्यायार्थत्वोपपादनसमाप्त्यर्थश्चरम इत्याहुः। प्रमाणसामान्यविचारप्रवृत्तिसाधनफलमाह तेने
ति। प्रमाणसामान्यस्यैव विचार्यत्वेनार्थवादादेः स्मृत्यादेश्च विचारस्याध्यायसंगतिः सिद्धेत्यर्थः। प्रकृतसंगतिः एत
स्यादस्य प्रथमपादसंगतिः। उच्यत इति शेषः। उपजीव्योपजीवकभावसंगत्यै पूर्वपादार्थस्योपजीव्यत्वं दर्शयितुं
तत्रत्यौत्पत्तिकसूत्रसिद्धमर्थं तावदाह चोदनानामिति। प्रामाण्ये उपपादिते इत्यन्वयः। औत्पत्तिकत्वेन नित्यत्वेन
तथा च पुरुषसंकेतितत्वप्रयुक्ताप्रामाण्यप्रसक्तिरिति भावः। तदुत्तरं तद्भूताधिकरणसिद्धमाह वाक्यार्थेति। मू राम·
लवत्तया आकांक्षादिमत्त्वेन तथा च तावतैव प्रमोत्पत्त्युपपन्नेः पूर्ववैदिकवाक्यानर्थसंबंधग्रहासंभवप्रयुक्ता २

प्रामाण्यं तद्ग्रहानपेक्षणादिति भावः। तदुक्तं वेदाधिकरणसिद्धमाह अनंतरेति। वेदद्वारेणेति। कठादिप्रणीतत्व
प्रयुक्तकाठकादिसमाख्यावगमितवेदपौरुषेयत्वद्वारेणेत्यर्थः। आद्यां किंतमिति। वेदानां पौरुषेयत्वेन तदवयवाना
मपि तद्वक्तृरूपं भावादिति भावः। तामेवाशंकां वेदपौरुषेयत्वहेतुगर्भितमाध्योक्तया दर्शयति। यथोक्तमिति। संनिकृष्ट
काला इत्यस्य व्याख्या इदानींतना इति। वेदानां पौरुषेयत्वेपि चोदनानां किं तत्राह तेनेति। अवश्यं चेति। भारतादिवाक्य
संघावयवेषु तथादर्शनादिति भावः। अत्रेति शाब्दे भाष्यग्रंथसमाप्तौ। अपौरुषेयत्वपेति। वाचा विरूपनित्ययेत्यादिश्रु
तेः काठकादिसंज्ञाया प्रवचनमात्रेणाप्युपपन्नेरिति भावः। अनूदितस्य प्रकृतोपयोगमाह एवमिति। प्रसक्तमिति।
तथा च पूर्वपादस्यैतद्धि चार्यं प्रामाण्यप्रसंजनायोपजीव्यत्वात्संगतिरित्यर्थः। प्रसंग एव वा संगतिः। उक्तेर्थे वार्त्तिकसं
मतिमाह तदिति। तत्पूर्वपादप्रमेयं इदमेतत्पादप्रमेयमुपसंगृह्योक्तमित्यर्थः। वार्त्तिकमुदाहरति सिद्धेति। ननु पू
र्वपादे चोदनाप्रामाण्यस्यैव व्युत्पादनात्सर्वशः सिद्धप्रमाणाभावस्येत्ययुक्तमित्याशंक्य श्लोकतात्पर्यं तत्तोप्याचष्टे ऽणा

२ र्थ इति। सिद्धेति॥ चोदनांशे सिद्धप्रमाणाभावं वेदमित्यन्वयः। विधेति। विध्यर्थवादमंत्ररूपेणेत्यर्थः। तावन्मात्रस्य
चोदनामात्रस्य विचार्यते संदिह्य निर्णीयते निर्णयप्रकारमेवाह न विधेरेवेति। अग्निमुपयोगशाहोत्राप्यनुप
3 ज्यते न विधेरेव धर्मप्रमितावुपयोगः साधनत्वं प्रामाण्यमिति यावत् किंतु विध्यर्थवादमंत्राणां सर्वेषामुपयोग इ
तिप्रतिपाद्यत इति योजना। अत्रोपयोगपदेन प्रमितिग्राह्यो द्रष्टव्यः। प्रतिपाद्यत इतीति शब्दस्योपक्रमस्थेनास्यार्थ
इत्यनेनान्वयः। सर्वशब्दस्य व्याख्या सर्वप्रकारमिति। क्रियाविशेषणं। प्रकारानेवाह विधीति। विधिर्विधानं। स्मृति
मिरिति तृतीयाऽभेदार्था प्रकारपदेनान्वेति। अनेन चेत्थंभोक्ता स्वरागमनिकाः सूचिताः। धर्मे विषये विध्यंशे सिद्धप्र
माणाभावस्य वेदस्य संबंधिनां विध्यर्थवादमंत्राणां सर्वेषां सर्वशः सर्वैर्विधिस्मृतिस्मृतिप्रकारैरुपयोगः प्रामाण्य
मित्यधुनोच्यत इति। एवं च सर्वशब्दस्य सिद्धपदेनान्वयानंगीकारान्नोक्ताशंकेति भावः। अत्र सर्वशब्दस्योन राद्धे राम०
नान्वयस्य स्वारसिकत्वाभावान्नामधेयस्य च परिसागादरूप्या प्रकारांतरेण योजनां दर्शयितुं तात्पर्यार्थमाह यद्वेति २

मे

अत्र समस्तस्य प्रामाण्यं सिद्धप्रायमित्यनेन सर्वशाखस्थस्य सिद्धपदेनान्वयः सूचितः। अर्थवादाद्यंशस्य बोधनशक्ति
निश्चयात्मागमार्थादपि प्रामाण्ये संभावनामात्रं न तु सिद्धिरित्यभिप्रेत्य सिद्धप्रायमित्युक्तं। आशंक्येति। सिद्धान्तवादि
त्वादिति भावः। स्थिरीक्रियत इति। शास्त्रार्थबोधनशक्त्यभावे विरक्तत्वाद्युपयोगो ज्ञातुमशक्य इत्यर्थः। ननु व्या
ख्यानद्वयेपि विधेरध्युनोपयोगानुक्तेर्विधिग्रहणं व्यर्थमित्याशंकामपनयन्नुक्तमर्थं विशदयति विध्यर्थवादेत्या
दिना। पूर्वं विधिः प्रमाणमिति बुद्धिसत्वेपि विध्यर्थवादमंत्राः प्रमाणमिति विधिशबलितवेदप्रामाण्यबुद्धेरेत
द्विचाराधीनत्वात् श्लोके विधिग्रहणमित्यमित्यर्थः। श्लोकस्यागमनिका तु धर्मे विषये सर्वशः सर्वावयवेषु सिद्धः
सिद्धप्रायः प्रमाणभावो यस्य वेदस्येति। अन्यत्स्पष्टं। अस्मिन्निति व्याख्याने नामधेयपरित्यागसाम्यादाह नामेति
। विधिशब्दस्यामुख्यार्थत्वात्सूचेराह पद इति। अर्थादिति। अविधेयस्यानुष्ठानासंभवादर्थापत्त्या विधिर्विधानोप
योगी कथित एवेत्यर्थः। अत्रेत्थं श्लोकयोजना सर्वशः कार्त्स्न्येन साम्नात्यो धर्मे सिद्धप्रमाणभावस्य वेदस्य सं

४ वंधिनां विध्यर्थवादमंत्राणां विशेषेण प्रामाण्यमधुनोच्यत इति। अत्रापि विध्यंशे आर्थिकत्वे उच्यत इत्यस्तंगा
५ ते णद्रष्टौ दुंवरेति। तत्र विधौ सत्येव समीहितसाधनत्वप्रतीतिरिति विध्यभावादुदुंवरतायाऊर्गवरोधसाधन
त्वासंभवो क्के रितिभावः। अस्याधिकरणस्य सामान्यविचारे विशेषविचारे च तात्पर्यमभिप्रेत्य सामान्यरूपेणाव
त्पूर्वोत्तरपक्षौ संक्षिप्य दर्शयति। तत्रेत्याद्यभिधास्यत इत्यंतेन तत्र द्विविधविचारे कर्तव्ये सति सर्वेषामर्थवादमं
त्रनामधेयानामानर्थक्यं। अर्थो धर्मलक्षणः प्रमेयफलत्वरूपत्वं धर्मप्रमितिजनकत्वरूपप्रामाण्याभाव इति यावत्
। अतश्च सामान्यतः प्रामाण्यस्य पूर्वपादएव सिद्धत्वादिहैतत्साधनं मुधेति चोद्यानवकाशः तत्र चोदनार्थमु
क्के नापौरुषेयत्वेनार्थवादादीनां प्रामाण्यापवादकदोषाभावमात्रसिद्धावप्युक्तप्रामाण्यस्यासिद्धेरितिभावः।
स्वाध्यायेति। फलवदर्थावबोधोद्देशेनाध्ययनविधानादित्यर्थः। अर्थवत्तया धर्मलक्षणप्रमेयवत्तया। अभिधास्य रा०म०
त इति। विधिनात्वेकवाक्यतादिति सिद्धांतस्तत्रावयवार्थस्य विध्येकवाक्यत्वहेतोस्तत्स्पंचसर्वप्राशस्त्यिकमितिशुत्रा ४

स्त्रार्थस्याध्ययनव्रतनियमतोऽस्येहेतोश्चार्थवादवन्मंत्रनामधेययोरपि साधारण्यादिति भावः। पश्चात्तामामन्य वि
चारानंतरं क्रमेणेति। आदावर्थवादानां ततो मंत्राणां ततोंत्यपादे नामधेयानामित्यर्थः। विशेषइति। अभिधास्यत
इत्यनुषंगः। इतीति। इति विचारद्वयं स्पष्टयत्यदर्शयितव्यं परंतु लाघवाय सहैव मया प्रदर्श्यत इत्यर्थः। न चात्र विध्य
तिरिक्तानीत्येतदुदाहृतवार्त्तिकविरुद्धं तत्र विधेरपि ग्रहणादिति शंकां तदविरोधिनोऽपि तद्व्याख्याप्रकारस्य दर्शित
त्वात्। विचारद्वयस्य मंत्रादिसाधारण्येऽपि प्रथममर्थवादानामेवोदाहरणे हेतुमाह नत्वेति। स्वस्यार्थेन विधीनां स्तुतिरिति
स्तुत्यानां मंत्रनामधेययोरधिकरणांतरदर्शनात्स्तुत्याणामर्थवादमात्रविषयत्वाद्यास्मिन्नधिकरणेऽर्थवादा
नेवोदाहृत्य विचारद्वयं क्रियत इत्यर्थः। विचारविषयमुदाहरति वायुरिति। एवमादीनीति। वाक्यानीति शेषः। विधी
ति। विधिर्विधायको लिङादिस्तद्व्यापारोऽर्थभावना तदंशत्रयं च भाव्यकरणेतिकर्त्तव्यतारूपं स्वर्गयागप्रयाजा
दि तदतिरिक्तार्थकानीत्यर्थः। न त्विह विधिभावनेति शब्दभावनामात्रस्यापूर्वपक्षिणा तदनंगीकारात्। अन्यथाऽर्थ

५ 5

वादानामपि तदंशत्रयांतर्गतत्वं निरस्तमिति कर्तव्यतार्थकत्वेन प्रामाण्यावश्यकत्वात्तदंशमात्रपूर्वपक्षानु
त्थेषां तत्र । एतत्केचपूर्वपक्षे तस्यावकुंठखंडनात् । वार्त्तिके च सिद्धांतसमर्पेयत्वेन तत्समुत्पादनात् । अर्थभावनाया
विधिवाक्यगतविशेषणानां त्वर्थवादादि – तात्पर्यानामप्युदाहरणत्वात् । तेषामर्थभावनार्थकत्वेप्यविधायकत्वेन
विधिवाच्यार्थभावनातिरिक्तार्थकत्वात् । अत एव सामान्यविचारे मंत्रनामधेयानामप्युदाहरणत्वसिद्धिः ॥ विचारां
गं संशयमाह तानि किमिति । विध्युद्देशेन विधिवाक्येन । तदर्थमिति । तदन्यतरकोटिनिर्णयार्थमित्यर्थः । एवमग्रेपि
बोध्यं । अत्र विध्युद्देशार्थवादयोः परस्पराकांक्षत्वे एकवाक्यत्वाभावादर्थवादानां धर्मे प्रामाण्यसिद्धिः । वैपरीत्ये
वैपरीत्यमिति फलफलिभावः । पूर्वपक्षसंकारिकया संगृह्णाति अर्थेति । भूतार्थेति । वायुक्षेपिष्ठत्वादि सिद्धार्थस्य
र्थः । समाप्यंते । निराकांक्षा भवंति । विशिष्टार्थेति । अंशत्रयविशिष्टभावनेत्यर्थः । प्रथमं स्वतो धर्मप्रमापकत्वाभा रम० ५
वरूपं सामान्यपूर्वपक्षमुपपादयति पयाश्रुतीति । संतं वायुक्षेपिष्ठत्वादिकं असंतमसि जां देवयजने दिस्रो हड्सा

दिकं। अधर्मग्रहणं दृष्टांतार्थं। ननु वायुवत्स्येनापि क्रियासु श्रेपिष्टेन भवितव्यमित्यध्याहारादिना धर्मप्रमितिसंभव
त्त्वादाह नचेति। आदिनाऽनुषंगादिग्रहः। सः वायुरेनं यजमानं द्वाराभावरूपं विशेषपूर्वपक्षमाहानाकांक्षत्वादिति
।ननु प्रयोजनवदर्थलाभायास्ति विध्युद्देशापेक्षा तत्राह विशिष्टेति। आख्यायिकेति। बलवर्मा नाम राजा वधूर्वेत्स्ये
वमादिरूपाणामित्यर्थः। लोके तथा न तु वेद इति शंकते स्वाध्यायेति। दृष्टः शब्दशक्तिलभ्यः। तेन अध्ययनविधिनाऽर्थ
कल्पनाधर्मलक्षणार्थांतरकल्पना अशक्यार्थबोधनशक्ते विधिरपतेनापि दुःसंपादत्वादिति भावः। नन्वेवमर्थवा
दाध्ययनं निष्प्रयोजनं स्यात्तत्राह तदिति। ततः प्रयोजनवदर्थांतरकल्पनाहरं पारायणादिना स्वर्गादिरू
पादृष्टप्रयोजनकल्पनमिति भावः। न चैवमध्ययनस्य विध्यंशे दृष्टार्थता अर्थवादांशे अदृष्टार्थतेति वैरूप्यं स्या
दिति शंक्यं। अध्ययनविधेरधीतस्वाध्यायेन यच्छक्यं प्रयोजनं तत्कुर्यादित्यर्थकतयानुगमसंभवात् म्लोकोत्तरांई
व्याचष्टे नापि विध्युद्देशस्येति। आकांक्षेत्यनुषंगः। विशिष्टेति। अंशत्रयविशिष्टार्थभावनाप्रतिपादनेनेत्यर्थः। न

६ नुलोके गौः कैयेत्यादौ दृष्टप्रवृत्त्यर्थवचसीत्यादिप्रशंसावद्वेदेऽप्यर्थवादिकप्रशंसापेक्षास्तीत्याशंक्य निषेध
ति। नचेति। वैदिकविधेर्निरपेक्षप्रमाणत्वान्न लोकसाम्यमिति भावः। किं चार्थवादैः शक्त्या प्राशस्त्यं प्रतिपाद्यते
6 लक्षणया वा नाद्य इत्याह नचेति। द्वितीयमुत्थाप्यान्वयानुपपत्तिरूपतद्बीजाभावेन दूषयति लक्षणायेति। ननु
विध्येकवाक्यतावगमितविशिष्टार्थतात्पर्यानुपपत्तिस्तद्बीजमिति शंकते एकेति। परस्पराकांक्षात्वेकवाक्यत्वे
हेतुः सा च दूषितेति मत्वाह नचेति। विशेषपूर्वपक्षमुपसंहरति। तस्मादिति। एवमर्थवादेषु स्वतो धर्मप्रमितिज
नकत्वाभावरूपः सामान्यपूर्वपक्षो द्वारविशेषाभावरूपो विशेषपूर्वपक्षश्चोपपादितस्तत्र सामान्यपूर्वपक्षं मंत्र
नामधेययोरप्यतिदिशत्येवमिति। तद्विशेषपूर्वपक्षस्तु तत्तदधिकरणे दर्शयिष्यत इति भावः। सामान्यपूर्वपक्ष राम०
मुपसंहरति। तस्मादिति। द्विविधपूर्वपक्षोपपादनफलमाह तेनेति। अवधारणापूर्वपादकृते इति शेषः। इतिशब्दस्यो ६
पक्रमगतेन पूर्वपक्ष इत्यनेन संबंधः। सिद्धान्तं कारिकया संगृह्णाति स्वाध्यायेति। स्वाध्यायाध्ययनविधिनेत्यर्थः। तत्र

सर्वांशसंते नसामान्यसिद्धांतोक्तिरवशिष्टेन तद्विशेषोक्तिः। नन्वध्ययनविधेः स्वर्गार्थतयापि पुरुषार्थपर्यवसानमुक्तमि
त्यांशं कथं सामान्यसिद्धांतभागं विवृणोति स्वाध्यायेति। दृष्टः फलवदर्थावबोधोर्थः प्रयोजनं यस्य विधेस्तत्त्वात्तथा च
हृत्तत्त्वस्य वेदस्यैकरूप्येणादृष्टप्रयोजनसंभवे क्वचिददृष्टार्थत्वेन वैरूप्यं यथाकथंचिदनुगमकल्पनं चायुक्तमितिभा
वः। अत एवार्थवादानां विधयेक्षितशाशास्त्रप्रतिपादने न धर्मप्रमोपयोगित्वमिति विशेषसिद्धांतभागं व्याचष्टेऽर्थवा
दानां चेति। वाचकपदाभावाद्वाक्यप्रमाणादित्युक्तं। ननु माभूत्स्वाध्यायस्याधीयैदर्थलक्षणाक्लेशोऽनउक्तं भूतेति। तेनेति। वाधु
र्वीद्दत्यादिवाक्येनेत्यर्थः। प्राशस्त्यहेतुमाह क्षिपेति। इतिहेतो। अनंतरेति। अव्यवहितपूर्वेत्यर्थः। प्रयोजनेति। अध्ययन
विधेरर्थवा [redacted] दांशे पाप्रयोजनाकांक्षानामित्यर्थः। गत्यते। अध्ययनविधिनेति शेषः। तथा च यदुक्तं विधु
द्देशार्थवादयोः स्वस्वार्थबोधनादेव नैराकांक्ष्यमिति तदसिद्धमिति भावः। यदुक्तं लक्षणाबीजमन्वयानुपपत्तिरिह
नास्तीति तत्र तात्पर्यानुपपत्तिरेव तद्बीजमनुगतत्वान्नात्पर्यग्राहकश्चात्राध्ययनविधिरेवेत्याह स्वाध्यायेति। पद्योक्तमे

७ कर्त्वाकाङ्क्षानिष्पद्यमानोऽतितद्तएवमिरलामित्साह तत्र श्चेति । दर्शितरीत्या परस्परसाकांक्षत्वादित्यर्थः । अत्रायं निष्क
र्षः ॥ विध्युद्देशस्य पुरुषप्रवर्त्तनाय विधेयस्तुत्यपेक्षायामर्थवादानां चाध्ययनविध्याक्षिप्तप्रयोजनवत्त्वाय स्वार्थत्यागे
न प्राशस्त्यलक्षणया स्तोतव्यापेक्षायां समभिव्याहारसिद्धपदस्यान्वयबलादेकवाक्यता निष्पद्यत इति पूर्वपक्षमनूद्य निर
स्यति यत्विति आदिना शब्दस्य शक्तिलभ्योऽर्थ इत्यंशमंगीकरोति सत्यमिति । तर्हि लक्षणा नवकाशस्तत्राह लाक्षणिकोपी
ति । इष्ट एव शब्दशक्तिलभ्य एव परंपरया शक्त्यैव लाभादित्यर्थः । तदेवाह इष्ट एव इति । तर्हि सर्वत्र लक्षणाप्रसंगस्तत्राह
संभवतीति । अनंतरप्रवृत्तविध्युद्देशाकांक्षितत्वादित्युक्तमुक्तांशं कानिरसनपूर्वकमुपपादयितुं पुनरुपाक्षिपति तद्धी
ति तत्प्राशस्त्यं विधिर्लिङादिः प्रवर्त्तनाय पुरुषप्रवृत्तिजननाय प्रत्ययमाशयः लिङादि हि आख्यातत्वसामान्यरूपेणार्थ
भावनायां शक्तः लिङ्त्वादिना विशेषरूपेण प्रवर्त्तनापरणा नियोगाद्यपरपर्यायशब्दभावनायां शक्तः मामानयेत्यादेग
वानयं नेमां प्रवर्त्तयतीत्यादिवोधोदयात् तथा च प्रवर्त्तना लोके वक्तृधर्मः तद्धर्मः वेदे तु वक्तुरभावाच्छब्दस्य लिङादेरेव

धर्मः अर्थभावना चांशत्रयवती च तत्रार्थभावनैव भाव्यांशः स्वज्ञानं करणांशः प्राशस्त्यमिति कर्त्तव्यतांशः तथा च
लिङादिरर्थभावनारूपपुरुषप्रवृत्तिजननीं प्रवर्त्तनां बोधयितुं प्राशस्त्यमपेक्षत इति। यत्त्रितयसार्थमप्युपक्षेपस्तामा
शंकामनुवदति यत्त्विति स्वयमेवेति प्राशस्त्यज्ञानव्यवच्छेदः तत्र हेतुगर्भमनपेक्षत इति निरपेक्षप्रमाणत्वादित्यर्थः
वाच्यत्वस्य प्रवर्त्तकतां वारयितुं समीहितेति अयमर्थः विधिर्हि लिङादिः स्वर्गादिभाव्यकां धात्वर्थकरणिकामर्थभावनां
पुरुषप्रवृत्तिरूपां बोधयन् तस्यां तज्जन्यस्य धात्वर्थस्य साक्षात्करणत्वानुपपत्त्यार्थात्तद्विशेषणीभूतभाव्यस्वर्गादिस
मीहितं प्रति तस्य करणत्वं बोधयन् तत्र पुरुषं प्रवर्त्तयेदिति। किमत्र लिङादिर्लिङ्-लादिरूपेण प्रवर्त्तनारूपशब्दभा
वनां प्रतिपादयत्तद्विषयत्वेनार्थभावनामाख्यातत्वेन बोधयन्नुक्तरीत्या धात्वर्थस्य समीहितसाधनतां बोधनेन तत्र
प्रवर्त्तयत्याहोस्वित्तामप्रतिपाद्यैवेति विकल्प्याद्यमंगीकरोति सत्यमिति विधिरेवेत्येवकारेण लडादिव्यवच्छेदः स
च द्वितीयविकल्पनिरासतात्पर्यकः यथा हि यजीत्युक्ते वेधप्रवर्त्तनानवगमाच्छ्रोतुः प्रवृत्तिस्तथैव यजेतेत्युक्तेऽपि वै

धपवर्त्तनानभ्युपगमे ऽप्याख्यातोक्तभावनायाः पुरुषार्थभाव्यानावश्यकत्वात्समानपदोपात्तधात्वर्थस्यैव भाव्यत्वेना
न्वयापत्तौ तत्र च कर्त्तृस्वात्मकेन कोपि प्रवर्त्तते ति। प्रधानमिति अध्ययनविधिना लिङादेरेव पुरुषप्रवर्त्तनेनियुक्तत्वादि
ति आकरे स्थितेरिति भावः ननु विधित एव स्वतन्त्रात्प्रवृत्तिसिद्धेः किं शास्त्रविचारस्य ज्ञानेनेत्याशंक्याह तस्यैवेति तन
त्सुपकरणापेक्षत्वात्तदर्थविद्यातिनीति भावः ननु कोसौ शास्त्रस्योक्तो नुग्रहः यदि फलसाधने रुचिः सा फलद्वव
साधनेपि स्वतः किं न स्यादित्याशंक्याह फलइति साधने स्वतो रुचिर्न तु भवपराहतापत्तत्कष्टं कर्मेति प्रद्वेष एव
स्वारसिकः फलरुच्यानुभवंती साधने क्वास्वारसिकप्रद्वेषप्रतिबद्धान प्रवृत्तिक्षमेत्यर्थः ननु मा भूत्साधने रुचिः फलरु
चिरेव साधने प्रवर्त्तयेत्तत्राह। अवश्यं चेति। रुचिरुत्कटेच्छा। नत्वन्यत्र रुच्या ऽन्यत्र प्रवृत्तिरतिप्रसंगादिति भावः। तर्हि
फलसाधनतावगतिरेव शास्त्रात्प्रवृत्तिकरी किं तद्रुच्या तत्राह। साधनतेति। जनयंत्येवेत्यन्वयः। सत्यामपि तस्यां
न तत्र रुच्यभावे प्रवृत्त्यदर्शनादिति भावः। अस्तु तर्हि फलरुचिसहकृतसाधनताधीजन्यया रुच्या तत्र प्रवृत्तिरित्या

शंकाप्रतिबंधकत्वादुत्पन्नाद्युक्तधियापि तदुच्चेरनुदयात्तदपनयाय प्राशस्त्यावगतिरावश्यकीत्याह। प्राचेति। साधन
नावगतिः। प्रतिबंधकान्येवाह। प्रमादेति। अवश्यकर्त्तव्येष्वप्रतिसंधाने प्रमादः तदभावेपि प्रवृत्तिमांद्यमालस्यं आ
दिनाप्राग्युक्ताः प्रद्वेषः। तद्युक्तेभ्यः पुरुषेभ्यः कर्मणि चयंतीपुरुषाणां कर्मणोरुचिं जनयंतीत्यर्थः। स्वतः कर्मणएव रुचि
र्गुणकथनान्नरुचिरिति चेत् तन्नेदानीं प्रसाध्यमित्याह। अवगतेति। इत्थं समर्थितानां विधीनामर्थवादानां च परस्पराकां
क्षानिबंधनामेकवाक्यतामनुवदंस्तद्धेतुकं प्राशस्त्यद्वारा धर्मप्रमितिजनकत्वरूपमर्थवाद — — मुपसंहरति। त
देवमिति। तन्नस्मादध्ययनविधिग्राहितानां प्रामाण्यावश्यंभावादित्यर्थः। एवं उक्तरीत्या — — वाह। विधीनामि
त्यादिना। वशेनप्रवर्त्तमानानामित्यन्वयः। दृष्टेति। दृष्टप्रयोजनभूतौ प्रवर्तनेः प्रवृत्तौ निमित्तसमर्पिप्रवर्त्तमानानां
व्यापृताणानां पुरुषप्रवृत्तिहेतुप्रवर्त्तनांबोधयतामितियावत्। तद्वशेनेव। अध्ययनविधिवशेनैव। नियमः। ए
कवाक्यता। इतिहेतौ एककार्यकरत्वात् विशिष्टेकार्थबोधजननात् तस्यैवानुवादस्तद्वशेने — तत्रार्थवादेषूक्तंसा

९ मान्यसिद्धांतं मंत्रेष्वतिदिशति। एवमिति। ननु मंत्राणां विध्युद्देशवद्विधायकत्वेनार्थवा—— त्तावकत्वेन प्रयोज
नवत्वं किं न स्यादित्याह। विधीति। निराकरणात् विधिमंत्राधिकरणे भाष्यादा——— किं तत्प्रयोजनं तदाह। प्र
करोति। आदिना लिंगादिः प्रधानेति। प्रयोजनस्मिकथनं· दृष्टमदृष्टं चेति। प्रमा एव तत्साधने प्रयोजनविशेषाना
ग्रहात्सामान्याभिप्रायं फलितमाह। नाप्रामाण्यमिति। नन्वदृष्टया सामाण्यमित्यर्थः· सिद्धमिति शेषः। प्रयोजनवत्वे
नप्रमिति करणत्वरूपं प्रामाण्यं न सिध्यतीति शंकते नन्विति। पदोपस्थापिताः पदार्था एव लक्षणया वाक्यार्थप्रमितिं
जनयंतीति सिद्धांतावष्टंभेन परिहरति। नैषइति। तस्मादिति वैति। वाक्यार्थप्रमाणमित्यर्थः। मंत्रविशिष्टमिति। मं
त्राद्युपकृतेन यागेन स्वर्गं भावयेदित्येवं रूपप्रधानविधिवाक्यार्थे मंत्राणां पदार्थविधया प्रामाण्यमस्तीत्यर्थः। ननु चे
वेशब्दरूपाणां मंत्राणां व्रीह्यादितो वैलक्षण्यं न स्यादिति वाच्यं व्रीह्यादीनां व्रीहिभिर्यजेतेति श्रवणात्स्वोपस्थितौ न राम·
व्यापारः मंत्राणां तु स्वोपस्थापकशब्दकल्पनाद्वारा स्वविशिष्टधर्मप्रमितौ व्यापार इति वैषम्यादिति भावः। नन्वेव ९

मप्युपक्रमे विधित्वकृतिस्मृतिप्रसिद्धिरुपपत्तिरिमं मंत्राणां स्मारकत्वरूपं प्रयोजनं नाद्यापि सिद्धमित्यत आह नेति। प
दार्थविधया प्रामाण्ये नेत्यर्थः। तथा च दृष्टादृष्टान्यतरप्रधानोपकाररूपप्रयोजनसामान्यवत्तया प्रधानांगत्वात्प्र
धानविधिवाक्यार्थघटकपदार्थविधया परं प्रमाणं मन्त्रोक्तं। अनुष्ठेयार्थप्रकाशनरूपदृष्टप्रयोजनविशेषद्वारकं तु
प्रामाण्यं मंत्राधिकरणे वक्ष्यत इत्यर्थः॥ अधिकरणं अधिकारं मंत्रे प्रसिद्धं सामान्यसिद्धं तन्नामधेयेष्वतिदिशति त
येति। उद्भिदादेरप्यध्ययनविधिपरिग्रहात्सामान्यतो धर्मप्रमितिजनकत्वरूपं प्रामाण्यं सिद्धं धात्वर्थोपरंजनद्वार
कं तु नसादे वक्ष्यत इत्यर्थः। परमप्रकृतमुपसंहरति इति सिद्धमिति। हेतुत्वान्वयस्तु हेत्वधिकरणे निराक्रियत इ
ति केचिन्मन्यते तस्यार्थः प्राभाकरतंत्रेऽर्थवादानां विध्यर्थे कार्ये हेतुत्वेनान्वयाद्धेतुसापेक्षत्वलक्षणमप्रामाण्यं प्रा
प्तं निराकर्तुमिदमधिकरणमित्युक्तं तदयुक्तं हेत्वधिकरणेन पौनरुक्त्यादिति। प्रयोजनं पूर्वपक्षे रात्रिसत्रादौ वि
श्वजिन्न्यायात्स्वर्गः फलं सिद्धान्ते आर्थवादिकमित्यादि। सूत्रे आम्नायस्य वेदस्य तद्भूतानां क्रियार्थेन समाम्नानादिति

१० क्रियार्थत्वावगमादक्रियार्थानामर्थवादादीनामानर्थक्यं प्रयोजनवदर्थशून्यत्वं।तस्मादक्रियार्थं सर्वमनित्यं लौ
किकवाक्यवदप्रमाणमुच्यत इति॥ ।विधिर्वा॥ आक्षेपिकीं संगतिमाह पूर्वेति। तुशब्दो विशेषार्थः। तमेव पूर्वो
न्ना क्तैकदेशांगीकाररूपं दर्शयन्नाक्षेपस्वरूपमाह यदित्यादिना। केषुचिदर्थवादत्वेनाभिमतेष्वित्यर्थः। पूर्वप
क्षिणा तत्र विधित्वांगीकारादिति शेषः। तानेवोदाहरति यथेत्यादिना। अमृतशब्दितो संततप्रसूतः सूक्ष्मोऽन्नरस उ
ग्रुच्यते। उदुंबरस्य पयोर्जा यजमानार्थमध्वर्युः पशुरूपामूर्जमाप्नोतीति ततो यूपस्योदुंबरत्वमूर्जः संपादनाय भवतीति
श्रुतेरर्थः। अमर्षेहे तु विधीयेतिभवतीत्युक्तमवनेन भावनाक्षेपात्पशुकामश्चौदुंबरं यूपं कुर्यादिति विधिसंभवादि
दुं त्यर्थः। विध्यभावपक्षे पश्वौदुंबरत्वयोः साध्यसाधनभावप्रमितिसंभवादित्यर्थः। विधिशब्दस्त्वज्ञातज्ञापनपरः। वि
ध्यभावपक्षेऽपि विधिविभक्तिरहितेनापि सत्यपि विधौ नार्थो विधिना। विधावसत्यर्थवादत एव विधिरुन्नेय इत्यादिग्रं राम०
थकारस्य व्यवहारादवगम्यते। संगतिमुपसंहरति इत्येवमिति। इत्युक्तहेतोरेवमुक्तरीत्या अत्रोदाहृतवाक्ये विचार्यते १०

संदिग्ध्यते। इत्यौदुंबरतायाइति विहितौदुंबरतायाः विध्यभावपक्षे इति प्रतीतौदुंबरतायाः फलं फलसमर्पकं सर्वैः
ऋग्भिरित्यादि रेवरूद्धाइत्यंतः विध्यभावपक्षे औदुंबरइत्यादि रेवरूद्धाइत्यंतः इति मूलचिंता समाप्तो। एवं जातीय
कत्वमेवाह विधिविभक्तीति। शंकते चेद्दूर्जो वरूद्धाइत्येतत्फलसमर्पकं। न चेन्नेति विचार्य्योः फलफलिभावः। इ
ति एतदर्थचिंता समाप्ता। तत्र तयोः संशयको योर्मध्ये पूर्वपक्ष उच्यत इति शेषः। यद्वा नार्थो विधिनेतीत्यत्र त्येनेति
शब्देनान्वेति। एवमग्रेपि तत्र तत्र आरभ्येयं। पशूनामौदुंबरतायाश्च साध्यसाधनभावरूपं पूर्वपक्षं वक्तुं पशूनां तावत्सा
ध्यत्वमुपपादयन् सूत्रं न्निमिति। शक्तस्येति। द्वितीयाचतुर्थ्योर्हूनमर्जं यतिध [redacted] नापसेवतइत्यादेः साध्यार्थकत्वदर्श
नादिति भावः। सिद्धांते दोषमाह लक्षणायेति। शक्तिसंभवे लक्षणा न युक्तेति भावः। इतोपि नार्थवादत्वमित्याह फले
ति। फलार्थविधौ अर्थवत्वं धर्मप्रमापकत्वं चानर्थकं तदभावः। यद्वा तत्सभावेपि निरर्थवादविधिवाक्यादिव प्रवृत्ति
सिद्धेर्निष्फलत्वमित्यर्थः। साध्यांशमुपपाद्य साधनांशमुपपादयति साध्यस्येति। उच्यादित्युक्तं। नन्वपेक्षितत्वेपि नो

११ धकविध्यभावेकथंतदवगमस्तत्राहासत्यपीति।विधौलिङादेर्भूतभव्यसमुच्चारसायेनभूतस्योदुंबरत्वस्यभव्यपशु
समभिव्याहारात्तत्साधनतावगमइतिभावः।ननुतथापिविधितःप्रवर्त्तनावगमेकथंप्रवृत्तिस्तत्राहसाधनत्वेति।वि
धिरूपिहिप्रवर्त्तनयाप्तमीहितसाधनतामाक्षिप्यैवप्रवर्त्तयेत्साचेदुक्तन्यायादपिसिद्धातिकिंविधिनिर्वंधेनइतरथास्व
तःसाधनतावगमादप्रवृत्तिप्रसंगादितिभावः।एवकारःप्रकृताभिप्रायः।किमत्रभवतीत्युक्तभवनाक्षिप्तभावनाकांक्ष
यापशश्रूनांभाव्यत्वेनसंवंधश्चाहोस्विद्भूतभव्यन्यायेनेतिविकल्पमभिप्रेत्यार्थनिरस्यतिविधाविति।विधौप्रवर्त्तनावोध
कलिङाद्यन्यतमेभावनायाःपुरुषप्रवृत्तेरौदुंबरतायापद्भवनंभवतिपरोक्तंतेनाक्षिप्तायाभवनंभावकव्यापारंविना
नोपपद्यतइतिकल्पितायाःसैवौदुंबरतैवभाव्येतिघटोभवतीत्यादौभवनकर्तुर्घटस्यैवभावककुलालव्यापारभा
व्यत्वदर्शनात्तद्वदिहापिस्यादित्यर्थः।फलंपशुरूपंभाव्यंनस्यादितिविपरिणामेनानुषंगः।अवैधप्रवृत्तेःप्ररूपार्थ राम०
भाव्यानावध्यकत्वादितिभावः।नियामकांतरमाहसंनिहितेति।भवनाक्षिप्तभावनायाःसाक्षादौदुंबरतासंनिहितामव ११

तिपदसमीपगतोदुंबरपदेनशीघ्रोपस्थापितात्पशुफलंतूर्जोवरुध्याइतिविलंबितोपस्थितिकमित्यर्थः।फलित
माहातोपीति।ननुद्वितीयादिविभक्त्यापशूनांसाध्यत्वाभिधानात्सिद्धसाध्यसमभिव्याहारन्यायेनोक्तसिद्धिरितिद्विती
यमाशंक्याहतेनेति।तथापितेनेत्यन्वयः।औदुंबरत्वस्यैवभाव्यत्वेनेत्यर्थः।अनन्यार्थकंअनपेक्षितत्वादनन्वितंसद्व्यर्थस्या
दित्यर्थः।नन्वतएवऊर्ग्वाउदुंबरइत्यत्रोक्तेनौदुंबरत्वस्यस्तूयमानत्वादविधेयस्यचत्तत्त्वयोगात्स्तुतितएवतस्यविधिरुन्नी त्युक्त
यतेतत्रस्वविहितस्यफलाकांक्षायामूर्जोवरुध्याइत्येतत्फलार्पकतयासार्थकंस्यादितिशंकतेइत्यर्थवादत्वइति।इ
तिहेतो।उक्तवैयर्थ्यप्रसंगादित्यर्थः।दूषयतिईनचेति।चस्त्वर्थः।उक्ताशंकाव्यावर्तकः।स्तुतित्वेनस्तुतिपरत्वेनवि
त्ते धिशक्तिंभवतीत्यर्थः।प्रत्युतमुपजननम्प्यनिश्चाय्य।पुनरुक्तेनेवेति।ऊर्ग्वाउदुंबरइत्यस्यस्तावकत्वेतदुपपाद्यार्थकत
यातदेकवाक्यतापन्नस्योर्जोवरुध्याइत्यस्यापिस्तावकत्वेनोपपत्त्यादितिभावः।वाक्येति।औदुंबरोयूपः।प्रशस्तत्वस्यच
पशवःफलमित्यर्थभेदेनवाक्यभेदप्रसंगादित्यर्थः।ननुसिद्धांते–यूपौदुंबरत्वस्यापूर्वत्वादुक्तरीत्याविध्यावश्यकत्वे

१२ पशूनां फलत्वात् उपगमाद्धि फलविधानापत्तिरित्याशंक्य सोमापौष्णं त्रैतमालभेत पशुकाम इति सन्निहिते विकृ
तियागे ऽतिदेशप्राप्तपूर्वोद्देशेनौदुम्बरत्वविध्युपगमात्तस्य च पूर्वप्रवृत्तक्रतूपकारेण फलनैराकांक्ष्यात्तस्मिन्क्रतु
गतफलसाधनत्वमुपचर्य तस्य स्तुत्यर्थोयमर्थवाद इत्यभिप्रेत्योपसंहरति तस्मादिति। उक्तफलकस्य नासंभवा
दित्यर्थः। किंच द्वितीयपादे ग्रामं गच्छन्तं ताम्रं स्पृशति ब्राह्मणाय स्पृशेत्यादिषु समीहितसाधनार्थकत्वस्याभिचारात्स्व
र्गकाम इत्यादिवत्कामिपदाभावे साध्यत्वं दुःसाधमित्यभिप्रेत्याह नचेति। चतुर्थ्येवमुपसर्गमपि जुहूर्भवति न स पापं
श्लोकं शृणोतीत्यादावपापश्लोकश्रवणादीनां फलत्वेन प्रतिपादनं न संभवति कामश्रुत्यभावादिति वस्तुत इत्यर्थः
। नहि तेनैतत्पुनरुक्तं तत्राह नत्विति। विधिविभक्त्यभावादौदुम्बरत्वपर्णमयत्वादीनां साधनत्वान्वयायोग्यत्वाद् जो वि
रुद्धो न स पापं श्लोकं शृणोतीत्यादीनामर्थवादत्वमत्रोक्तं तत्र कामश्रुत्यभावेन साध्यत्वप्रतिपादनाशङ्केत्यर्थ इत्याह। उ
क्तविभागे विनिगमकाभावाद्विपरीतस्यापि सुवचत्वादस्वरसादाह अथ वेति। रात्रीति। प्रतितिष्ठन्ति ह वा य एता रात्रीरु रा
त्वमित्यपोनरुक्त्यमित्यर्थः ।२

राम. १२

ति र्या

पर्यंतीत्यत्रस्तुतीति समर्पकस्येव फलसमर्पकत्ववदित्यर्थः ॥ निराकरिष्यत इति । तत्रान्यतः फलाकांक्षायामाशं
नेरागत्यात्तथात्वमौदुंबरतापर्णतादीनां तु क्रतूपकारे सावतच्छांतेर्नार्थवादिकफलकत्वमिति परिहरिष्यत
इत्यर्थः । ननु पशुकाम औदुंबरं यूपं कुर्वीतेति गुणफलविधिनैकवाक्यत्वसंभवेऽनतिप्रयोजनस्तुतिपरतये
कवाक्यत्वमयुक्तं विधिकल्पनक्लेशस्यापि द्वयोरपि तुल्यत्वादित्याशंक्यौदुंबरत्व[illegible]स्यासिद्धरूपस्य कर्तव्यापा
ररूपमाश्रयं विना फले विधानासंभवादाश्रयो वाच्यः स च किं सन्निधानाद्वाक्याद्वा लभ्यत इति विकल्प्याद्य आह
न चेति । प्रकरणात्सन्निधानादित्यर्थः । विकृतेः प्रकरणाभावात् आद्यस्यासंतासंभवदुक्तिकत्वं द्योतयितुं तत्र दोष त
मनुक्त्वासंभवदुक्तिके द्वितीये दोषं प्रतिजानीते तत्रेति । प्रकरणादलाभे सतीत्यर्थः । ननु कथमाद्यस्यासंभवदुक्ति
कत्वं सन्निहितस्य पागस्य नियोजनस्य तद्धि शिष्टयूपस्य वाश्रयत्वसंभवादित्याशंक्याद्यमयोगपत्ते न दूषयति
पश्चेति । प्रकृतः पाठसन्निहितः श्रुतोत्रजातिद्वयशुक्लादिर्ग्राह्यः तेन दाक्षायणयज्ञेन स्वर्गकामो यजेत पशुका

१२ 13

मङ्गलादावाहवनीयादिरूपगुणस्य दर्शपूर्णमासादिप्रकरणत्वाभावेऽपि न दोषः। यथेति। दध्नेन्द्रियकामस्य जुहुयादि
तीन्द्रियफले विहितस्य दध्नो गुणस्याग्निहोत्रहोमवदित्यर्थः। नचेति। जातेरमूर्त्तत्वादित्यर्थः। नच जातेरपि स्व
परिच्छेद्यद्रव्यद्वारा कारकत्वया क्रियान्विती निशांकं परिच्छेद्यस्य यूपस्य यागे कारकत्वाश्रवणात्। अभ्युपेत्याह तदा
श्रयत्व इति। यागाश्रयत्वे यूपपदेनाश्रययागानुवादासंभवाद्यूपपदानर्थक्यमित्यर्थः। द्वितीयमाह नेयत्विति। योग्य
मिति। तत्र यूपे पशुं नियुञ्जीतेति यूपस्य कारकत्वश्रवणादौदुंबरताया यूपद्वारा कारकत्वयोग्यताया यूपपदेन लक्ष
णयानुवादसंभवाच्चेति भावः। योग्यत्वेऽप्यसंनिहितमिति। तृतीयेन सह दूषयति तदपीति। अपवदन्तं सोमापौष्णप
शावनाम्नानात्साध्यतोऽसंनिहितं। अतिदेशतःसंनिधिमाशंक्य दूषयति नचेति। इत्थंभावं अखंडोपकार्यसामान्येन
सर्वपदार्थविशिष्टत्वेन यूपस्य नियोजनस्य चेति शेषः। स्वरूपेणास्यातंत्र्येणोद्देश्यमात्राधिकरणन्यायेनोपकारविशे
षणानयैव पदार्थानामतिदेशादिति भावः। ननु विशेषणानयोपस्थितिमात्रेणाश्रयत्वमस्त्विति तत्राह विपरिवर्त्तमा राम·
१२

नइति। स्वरूपेणोऽस्यानुपपत्ते। अस्यान्वितत्वेनोपस्थितत्वेनास्याप्रयत्नायोग्यत्वादिति भावः। ननु विशिष्टविधौ [redacted]
[redacted] विशेषणानामभिवार्थीस्य सार्थानामतिदेशात्स्वदार्थदृष्टभावेनशास्त्रार्थाणामप्यतिदेशांगीकारात्स्वस्वशास्त्रे:
पदार्थानां स्वातंत्र्येणोपस्थितिरस्त्यन्यथा तथाविधरूपानुवादेनौदुंबरताविधिर्नस्यादिति तत्राह तावतीति। आतिदे
शिकीत्यर्थः। इष्टापत्त्या वा हतत्रेति। एवं संनिधानादाप्रयत्नाभस्यासंभवदुक्तिकत्वाद्यूपपदेनैव यूपमुपस्थाप्यत
स्य सिद्धरूपस्यापि नियोजनविशिष्टतया साध्यत्वाद्वा क्रमप्रमाणेनौदुंबरतोद्देशेनाप्रयत्यविधिरिति पहितीयं तत्र
प्रतिज्ञातं दोषं स्फुटयति तत्रेति। तत्र संनिधिवाक्ययोर्मध्ये वाक्यभेदः औदुंबरत्वेन फलं भावयेत्तस्य च यूपआश्रय
इत्येवंरूपः। दध्नेंद्रियकामस्य जुहुयादित्यादौ यथानासौ दोषस्तथा द्वितीये वक्ष्यते। प्राभाकरैस्तु औदुंबरो यूपो भवती
ति यूपोदुंबरत्वसंबंधविधेरूर्जपशुनाशेतीति पशुदुंबरसंबंधविधेश्चाप्रतीतेर्वाक्यभेदो वा ऊर्जापशुनाशेतीत्यस्य
स्तुतिपरत्वावलंबनेन सस्तुतिकौदुंबरताविधेर्भिन्नादेकवाक्यत्वं वेत्यनध्यवसायाद्यदा माण्यमिति दर्शपसंहृत्यैकवा

१४ कात्वस्याभावत्वात्तत्कृतिकविधिपरत्वमेवेतिसिद्धांतितं तद्दूषयति एकदेशिनामिति। एकदेशिभिर्यदेकेनवाक्येना
14 श्रयफलसंवंधद्वयवोधनासंभवाद्वाक्यभेदो वाधवेकवाक्यत्वमित्यनध्यवसायरूपमप्रामाण्यमाशंक्यत्तत्सर्थत्वंसि
द्धांतितं तदनर्थकं दध्नेंद्रियकामस्य जुहुयादित्यादिगुणफलसंवंधविधिस्थलेदध्यनुरक्तो होमः फलाय विधीय
त इति दध्नो होमसंवंधं फलसंवंधं च वाक्येनैव स्वीकुर्वतामिहाप्येकेनैव वाक्येन यूपोदुंवरसंवंधस्यौदुंवर्याः फलसंवंध
स्य च संभवाद्वाक्यभेदापत्त्या तादृशपूर्वपक्षानुन्मेषादिति योजना। कश्चिदिति। अनध्यवसायपूर्वपक्षंसमर्थयमा
न इत्यर्थः। अदृष्टत्वात् तत्तत्रागादिजन्यसंस्कारविशिष्टरूपेणाशास्त्रैकगम्यत्वात् दधिहोमेति। व्यतिरेकदृष्टांतः। तथा
च तत्संवंधस्य क्रियाकारकसंवंधतया लोकसिद्धत्वात्तस्य न विधेयः किंतु लोकसिद्धं तमाश्रित्य फलहोमसंवंध एव वि
धेयः। दध्यनुरक्तरूपापन्नस्यैव होमस्य फलविधिविषयत्वाद्यफलार्थिनो नियमेन दध्युपादानसिद्धिः। तावतैव चास्य राम०
न्मते दधिहोमसंवंधस्यापि वाक्यीयत्वव्यवहारः। वाक्यीयत्वफलहोमसंवंध एवयौदुंवरतायास्तु यूपसंवंधस्य शास्त्री १४

यत्वात्फलसंबंधस्यापि तथात्वा — — भेदावश्यंभावेनानध्यवसाय पूर्वपक्षो युक्त इति भावः। तदस्त्विति। प्रकृतगुणा
श्रयसंबंधस्यापि दधिहोमसंबंधवदलौकिकत्वसाम्यादिति भावः। ननु पूपत्वस्यालौकिकत्वाद्दूषणमयुक्तं तत्राह यद्य
पीति। अदृष्टमिति। तथापीति शेषः। लौकिक एवेति। अन्यथा विशेषणसंस्कारस्यालौकिकत्वमात्रेण तद्विशेष्यकाष्ठे
जातिरूपगुणासंबंधस्यालौकिकत्वे अलौकिकदेवतोद्देशविशिष्टप्रक्षेपरूपहोमस्याप्यलौकिकत्वेन होमसंबंधोप्य
म लौकिकः स्यादित्यर्थः। एवं नंगीकारे दंडमाह यदि चेति। न स्यादिति। तत्रापि पूपत्वस्यालौकिकत्वाद्गुणाश्रयसंबंधे गुण
फलसंबंधे च वाक्यभेदावश्यंभावादिति भावः। कार्त्तमशां ननु अवगतमप्येकवाक्यत्वमनुपपन्नं स्यात्स्याऽयं तत्राह यदीति।
सुतरामिति। तथा च नानध्यवसाय इति भावः। तत्राश्रयसंबंधस्यालौकिकत्वेपि घाकांतरान्न सिद्धेर्न वाक्यभेदप्र
संग इति शंकते अथेति। न स्यादिति। त्वादिरेपूर्वो भवतीत्यस्य गुणफलविधाये क्षितं गुणाश्रयसंबंधबोधकत्वेन क्र
त्वर्थत्वाबोधकत्वादिति भावः। उक्थ्यवदिति। पशुकाम उक्थ्यं गृह्णीयादिति। ज्योतिष्टोममात्रस्य फलार्थविहितालो

१५ किंकोऽस्यस्वरूपज्ञापनेपटुस्योगस्यतइतिप्राकरणिकवाक्यस्योपपस्यादुस्यसंस्थापानङ्गत्वर्थता।एवंयत्का
15 मोऽमूढछंदसाद्वादशाहेनयजेतसोमेकामःसमृद्धतइतिविधीयमानालौकिकमूढत्वेग्रहाग्रताविशेषरूपेऐं
द्रवायवाग्रौप्रायणीयोदयनीयावथेतरेषांदशानामन्हामैंद्रवायवाग्रंप्रथममहःपृथशुक्राग्रंमथद्वेआग्रयणाग्रे
इत्यादिमूढोस्पन्निवाक्यस्योपपस्यान्नमूढक्रत्वर्थतातद्वदित्यर्थः।इष्टापत्तिमाशंक्याहउभयेति।दधिग्रहस्येति।प्रा
जापत्यंदधिग्रहंगृह्णीयादितिदधिग्रहंगृह्णीयात्सर्वकामस्येतिचविहितस्येत्यर्थः।इनिवदतइति।दधिग्रहस्यक्र
तुरूपोभयार्थत्वेखादिरत्वदृष्टांतीकुर्वतस्तत्खादिरत्वमुभयार्थमिष्टमित्यर्थः।यदिखादिरस्थलेऽप्याक्षेपाद्विधांतरकल्प
नाद्वाक्यपलाभंब्रूयात्तदातापित्तसंभवात्मुधानिरर्थकस्यसर्थत्ववर्णनमित्याशयेनाह।आत्तामिति।अधिकरणार्थमु
पसंहरतितस्मादिति।विधीयतइति।अर्थवादकल्पितविधिनाकल्पितलेट्त्वेनभवतीतिपदेनवेतिशेषः।प्रयो राम०
जनंपूर्वपक्षेऽप्यौदुंबरतायाःफलार्थनानुष्ठानंसिद्धांतेतुक्रत्वर्थेनेति।सूत्रेऊर्गवरोधफलसमानांतराम्नातत्वात् १५

त्वापकमेवेदं वाक्यं न त्वर्थवादः यस्मादर्थवादमात्रमनर्थकमिति॥ ॥हेतुर्वा॥ संगतिं वक्तुं वृत्तमनूद्यैतद्विचार्य
माह एवमित्यादिना। आनर्थक्यं प्रतियोगि सिद्धान्तयुक्त्या निरसनीयं येषां ते तथोक्ताः एवमग्रेपि। तथा चाद्येधि
करणे सर्वे आनर्थक्यप्रतियोगित्वेन द्वितीये तन्मध्ये केचिद्विधिप्रतियोगित्वेन विचारिताः इदानीं तन्मध्ये केचन
हेतुप्रतियोगित्वेन विचार्यन्ते। तथा च सर्वेषां विधिवन्निगदानां न स्तुत्यर्थत्वं क्वचिद्धेतुविधिसंभवादित्याक्षेपात्संग
तिरिति भावः। न केवलं लक्षणादोषो वैयर्थ्यं चेत्याह अनर्थके ति। कपिंजलवाक्यवद्विधेरेवक्त तिशक्तेरपि कल्प
नादिति भावः। ननु वैदिकेर्थे हेतुरप्यनपेक्षितत्वादर्थं स्तुत्यर्थत्वे तु विधेः शक्तिशक्त्यकल्पनाद्गौरवमध्ययन
विध्यनुग्रहश्चेत्यादि स्यत आह हेतुरिति। वैदिकेप्यर्थेधिकार्यप्रायको हेतुर्न व्यर्थोऽस्ति चात्र दर्व्यादीनामपि होम
साधनत्वप्राप्तिरिति भावः। अर्थः प्रयोजनं। ननु शूर्पेण गतान्नकरणत्वहेतुना कथं दर्व्यादीनां होमसाधनत्वसिद्धिरि
तिमन्वानः पृच्छति कइति। अन्नकरणत्वमात्रं हेतुरित्याशयेनोत्तरमाह येनेति। नन्वामत्स्येव हेतुत्वादन्नकरणत्व

१६ 16

स्य चशात्रिगस्य होमसाधनत्वेन सहग्रासेर्लौकसिद्धत्वाभावात्कथं तस्य तन्त्रहेतुत्वमिति शंकते कथमिति। हेतु
त्वस्फातिवलात्कल्पितवचनेन व्याप्तिसिद्धिरित्याह अत एवेति। तर्हि युक्त्याप्तिवचनेन शूर्पस्यापि होमसाधनत्व
सिद्धेः पुनस्तद्विधानं व्यर्थं स्यादत आह तेनेति। सर्वैरिति। सर्वमन्त्रकरणां होमसाधनत्वेन विधानादिति तथोक्तेन अ
वयुत्य सर्वेषु प्राप्तेषु शूर्पमात्रस्य पृथक्कृत्यानुवादः। एवं चैकेन कल्पितवाक्येन शूर्पस्य दर्व्यादीनां च विधानान्न वि
षमशिष्टविकल्पापत्तिरिति भावः। ननु कल्पितवचनस्यैव सर्वविधापकत्वे क्लृप्तवचनस्य को पयोग इत्याशं
क्य तदुपयोगमाह तेनेति। क्लृप्तवचनस्याहाप्येनेत्यर्थः। ईदृशं सर्वान्त्रकरणां संग्राहकं दद्दं वक्ष्यमाणां तदेवाह शूर्पस्ये
ति। हितो रिसंतः। क्लृप्तैकदेशः अवशिष्टोऽनुमितैकदेश इति विवेकः। इतीत्यनंतरमिति शाहांतरं दृष्टव्यं। यदुक्तं शू
र्पेणाजुहोतीत्यस्य वयुत्यानुवाद इति तदयुक्तं तत्राहि शूर्पेणाहोतव्यत्वं प्रतिज्ञायते न हीत्यनेन हेतुरूपन्यस्य नीयस्त
त अप्रथमप्रवृत्तस्यानुवादत्वासंभवान्तदेव शूर्पस्य होमकरणत्वाविधायकमित्याह शूर्पस्येति। तृतीयया शूर्पे ए०म० १६

णोऽन्वनया। तथा च धर्ष्यस्य दर्व्यादीनां च विषमधिष्ठत्वमेवेति भावः। ततः किं तदाह न तदिति। तत्र सप्तवचनविहि
तं। आनुमानिकैर्दिस तुल्यबलत्वमुक्तं। एवमधिकार्थलाभस्यास्ति द्वे हेतो वैय्यर्थ्यात्सरिशेषा द्विधेः स्फूर्तिशक्तिक
रा ल्पना गौरवपरिहारो ज्ञातावकत्वमेवेत्याशयेनाह न चेत्यादिना। लाभांतरमाह एवं चेति। ननु स्फूर्तिरप्यस्य दर्थाकथं
स्यान्न हि दर्व्यस्य होमसाधनतादशायां क्रियतइत्युक्तवर्त्तमानान्न क्रियासंभवतीत्याशंक्य स्फूर्तेतस्यास्त्संतानुशरणमा
ह क्रियतइति। तदुपपादयति नहीति। इयं गोरिदानीं चरुर्णीरे इत्युक्ता विवासीद्रुविष्यतीति वोक्ते प्रतीत्यदर्शनादिति भावः
। लक्षणायाप्राशस्त्यलक्षणाया। ननु लक्षणो वदोषः। न। फलवित्त्वप्रयोजनसत्त्वात्। न विधौ परः शब्दार्थ इति न्यायादित्य
भिप्रेत्याह विधीति। अधिकार्थलाभस्य निरस्तत्वान्निष्प्रयोजनमित्युक्तं। कथानुपपत्त्या विधौ लक्षणेत्यत आह न चेति।
वर्त्तमानान्न क्रियादशायां होमाशक्त्या वर्त्तमाननिर्देशो लाक्षणिकः पाकस्यैवाव्यवहितस्य मुख्यान्नकरणत्वात्स्फूर्यस्य
चास्त्संतव्यवहितस्य गोरेणं तत्करणत्वं तेनेत्यनेन लक्षणीयमित्यर्थः। स्फूर्तेत्यनेनत्यं नं क्रियतइति हेतुर्विधिः स्यात् दर्व्या

१८ दीनामपि होमसाधनत्वापादनेनार्थवत्वात् द्विशब्दस्यस्तुपपन्नत्वेश्च ॥ ॥ तदर्थ्य ॥ विधिसमभिव्याहृतार्थवादविचारानं
तरं तदसमभिव्याहृतमंत्रविचारः अवसरसंगतिमाह गतइति । ननु मंत्राणामप्यर्थ्याद्यधिकरणे विचारितत्वात्तु न
17 त्तद्विचारो व्यर्थ इत्याशंक्याह तेषामपीति । अर्थवत्वं यासामान्यतो दृष्टादृष्टान्यतरप्रयोजनवत्वं यां पर्यवसितं सा
मान्यतः पदार्थविषयाप्रामाण्यमात्रं तत्पर्यवसानाय सामान्यस्य विशेषविना पर्यवसानाभावादिति भावः । अर्थवि
शेषः अनुष्ठेयप्रकाशनेन शब्दविषयाप्रामाण्यरूपः । उक्तं त्वेवमेवार्थवादाधिकरणे ग्रंथकारेण तेन मंत्राणाम
पि प्रयोजनवत्वात्प्रामाण्यमस्तीत्येतावत्सिद्धमित्यादितदेवेहस्मारितमिति बोध्यं । तेषां विचारे पाथिकमंगत्वं सप्र
माणमुपक्षिपन् संशयमाह ते पंचेत्यादिना । प्रकरणेनक्रत्वंगत्वं क्रमेणात तत्पदार्थांगत्वं । इदमुपलक्षणं लिं राम.
गातिरिक्तानामन्येषामपि लिंगस्येव पूर्वपक्षिणानभ्युपगमात् । कुर्वतामित्यत्रस्येति शब्दस्यचिंत्यत इति पूर्वेणान्व १८
यः । तत्र तयोः को धर्मोपेक्षेदृष्टार्थता । अनुष्ठेयार्थप्रकाशनरूपदृष्टप्रयोजनता । एवकारेणादृष्टव्यावृत्तिः । मंत्राणामा

म्नानं नित्यवदाम्नानं अनर्थकं उपायांतरादेव तत्प्रयोजनसिद्धेरिति भावः । ननु मंत्रैरेव प्रत्यायनाददृष्टं कल्प्यते तत्रा
ह प्रत्यायनादिति । मंत्रैरेवानुष्ठेयप्रकाशनादित्यर्थः । वरमिति । उच्चारणस्यैव पुरुषप्रवृत्तिसाध्यत्वेन विधेयतयाप्र
लाकांक्षत्वान्नत एवादृष्टकल्पनं युक्तं न तु प्रवृत्तसाध्यत्वेनाविधेयात्प्रत्यायनादित्यर्थः । श्लोकं व्याचष्टे शाकातेहीति ।
उपायेति । कल्पसूत्रोपदिष्टवचनात्मीयग्रहणाकवाक्यादिरूपेणेत्यर्थः ॥ नित्यवदिति वतिः स्वार्थे अर्थप्रकाशनार्थत्वे
उपायांतरैः पाक्षिकप्राप्तानित्याम्नानं विरुद्धमित्यर्थः । मंत्रेति । मंत्रैरेव प्रत्यायनादित्युपायनियमादिति यावत् । कल्प्ये
त नित्यवदाम्नानार्थवत्तायेति शेषः । ननु कीदृशं दृष्टत्वमुच्चारणादेवेत्यवधारणं वा कुत इत्यपेक्षायामवधारणाहेतुं
तावदाह तद्धीति । उच्चारणमित्यर्थः । तस्मिन्नुच्चारणे स्वयमनुतिष्ठ्यादि एवं न पुरुषव्यापारगोचरः । न तत्र तदाश्रि
त नियमोपि निवृत्तिरूपत्वान्न नञो चर इत्याशयः । किं तत्तत्तदाह सेति । ततोपि किं तत्राह प्रत्येति । फलितमाह तेने
ति । दृष्टत्वं प्रदर्शयितुमस्याप्युक्तत्वमाह नत्वित्यादिना । उच्चारणादृष्टयोर्मध्ये प्रत्यायनेन तदाश्रितमंत्रनियमेन वाव्यव

१८ धानं दूरत्वमित्यर्थः। न्यायतः पूर्वपक्षमुक्त्वा तत्र लिंगदर्शनमाह तथा चेति। अदृष्टार्थत्वे सतिनां चतुर्भिरभ्रिमादत्ते
18 उरुप्रथस्वेति पुरोडाशं प्रथयति इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यादिकं तस्मिन्मंत्रप्रकाश्येऽर्थे मंत्र
विनियोजकं शास्त्रमुपपद्यते अर्थप्रकाशनार्थत्वे त्वर्थप्रकाशनसामर्थ्यरूपाल्लिंगादेव तत्प्रकाश्येऽर्थे विनियोगसिद्धेस्त
दर्थं शास्त्रमनर्थकं स्यादित्यर्थः। आदिशब्देन यथाधीतपदानुपूर्वीरूपवाक्यातिप्रमादयोगस्त्यंते। ननु देवस्य त्वा सवि
तुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां गायत्रेण छंदसाददेंगिरस्वदित्यादीनां मंत्राणां लिंगेनाभ्र्यादाने विनियोगे पि
नां चतुर्भिरभ्रिमादत्त इति वचनं संख्यारूपगुणविधानार्थं। उरुप्रथस्वेति पुरोडाशं प्रथयतीति वचनमर्थवादरूपं इ
मा~गृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इति वचनं मंत्रलिंगाविशेषादग्निचयने गर्दभरशनायामपि मंत्र
स्य प्राप्तौ अश्वरशनामेवादत्ते न तु गर्दभरशनामित्येवं तन्निवृत्त्यर्थमतो न तदर्थशास्त्रानर्थक्यमित्याशंक्याह इतरथे रा.म०
ति। अश्वाभिधानीमादत्त इत्यस्य गर्दभरशनातो मंत्रव्यावृत्त्यर्थत्वेऽश्वरशनाग्रहणरूपस्वार्थत्यागो गर्दभरशनावर्जन १८

रूपपदार्थस्वीकारो गर्दभरशनाग्रहणे लिंगात्तस्य मंत्रस्य बाधश्चेति त्रयो दोषाः स्युः उरु प्रथस्वेति पुरोडाशं प्रथय
तीत्यस्य ब्राह्मणोपठितस्य मंत्रसमानदेशमंत्रलिंगकल्पितमंत्रविध्यपेक्षया भिन्नदेशत्वेन तदर्थवादत्वानुपपत्तेः
। तथा देवस्य त्वेत्यादिमंत्राणां चतुर्णामाम्नानात्स च यद्यपि ष्टा चतुःसंख्यासिद्धेति गुणविध्यर्थतां चतुर्भिरिति वाक्य
मनर्थकमतः परिसंख्याद्यर्थत्वेन तत्स्वीकारे त्रैदोष्यमेव दोषः स्यादित्यर्थः। यदुक्तमुच्चारणादृष्टमिति तत्र दृष्टसंभवे त्व
दृष्टकल्पनस्यान्याय्यत्वादित्याह यस्येति। किं तदुच्चारणस्य दृष्टं फलं तत्राहानुष्ठेयेति। स्मृतेः स्मरणान्। चोऽवधारणे। ननु
स्मरणं स्वरूपेणानपुरुषार्थमित्याह स्मारणं चेति। प्रयोगस्याशुरूपार्थ इत्यर्थः। ननु स्मरणमुपायांतरादपि संभवति मं
त्रैरेव स्मर्त्तव्यमिति नियमाददृष्टकल्पनेनैव वरमुच्चारणादेव साक्षान्नकल्पनमित्युक्तमित्याशंक्याह यस्त्विति। प्रयो
जनान्यथानुपपत्त्यादृष्टं कल्प्येत सा तु नियमेऽस्ति न तूच्चारण इति भावः। लिंगदर्शनं विघटयति तद्दर्शेति। गुणा
र्थेति। चतुष्ट्वसंख्याया आदानांगत्वमप्राप्तं तां चतुर्भिरिति विधीयते। उरु प्रथस्वेति पुरोडाशं प्रथयतीत्यस्य भिन्नदेश

तथामंत्रलिंगकल्प्यमंत्रविधिशेषत्वासंभवेप्येवनाकेपुरोडाशंप्रथयतीत्यंशेनपुरोडाशप्रथनंविधीयतेउ
रुप्रथस्वेतिमंत्रकरणांशेनतद्देवप्रथनंयज्ञयतिप्रथनप्रकाशकमंत्रकरणकत्वात्प्रशस्तमितिस्तूयते।ततश्चो
रुप्रथस्वेतिमंत्रकरणांशोऽर्थवादः इत्यस्याभिधानीमादत्त इतिचलैंगिकविनियोगात्प्रागेवप्रत्यक्षवचनेनविनि
योगात्प्राप्तपरिसंख्येतिनत्रैदोष्यमितिसूत्रैरेवपरिहृतमित्यर्थः।नन्वर्थस्मारकत्वमात्रेणकथमनधिगतार्थ
गंतृत्वरूपप्रामाण्यमित्याशंक्यमांत्रवर्णिकदेवतासूक्तवाकफलादीनांसिद्ध्यातद्विशिष्टधर्मप्रमित्युपयोगित
याप्रामाण्यसिद्धिरित्याशयेनोपसंहरतितस्मादिति॥ ॥इतिश्रीचंपकनाथकृतौशास्त्रदीपिकाव्याख्यायांप्रका
शाख्यायांप्रथमाध्यायस्यद्वितीयःपादः॥ ॥धर्मस्य॥ अस्मिन्पादेक्रियमाणस्यस्मृतिपुराणेतिहासकल्पसू
त्राचारादिप्रामाण्यविचारस्याध्यायसंगतिंवक्तुंधर्मप्रमाणसामान्यनिरूपणमध्यायार्थइतिप्रागुक्तंस्मारयति
कथमिति।किंधर्मेप्रमाणंकथंचतस्यप्रामाण्यमित्यर्थः।ततश्चप्रथमपक्षानुसाराद्धर्मप्रमाणसामान्यांतर्गत

स्मृत्यादिविचारोऽत्रसंगतइतिभावः।पादानंतर्यमाह तदेवंकृत्स्नपादस्यार्थमनुवदति तत्रप्रथमइति।साक्षाद्धर्मप्रमापक
त्वादादौविधीनांततस्तदेकवाक्यत्वादर्थवादादीनांप्रामाण्यंसाधितमित्यर्थः।एवंमूलभूतवेदप्रामाण्येसिद्धेतन्मूल
कस्मृत्यादिप्रामाण्यविचारस्यमूलमूलिभावसंगत्यानंतर्यमित्याहद्वितीयमिति।उद्भिदादिनामधेयानामप्याधि
कत्वेसामान्यतःप्रामाण्यस्यसाधितत्वाद्गुणविधित्वेऽपिप्रामाण्यासत्तेश्चकुतस्त्वस्येत्युक्तं।स्मृतीनांप्रायेणामंत्रार्थ
वादमूलकत्वात्तत्प्रामाण्यस्यमंत्रादिप्रामाण्याधीनत्वात्स्मृतिविचारस्यतद्विचारानंतर्यं।नामधेयंतुनकस्याप्यस्मृ
तेर्मूलमितिनतद्विचारानंतर्यं।परिशेषात्तुसर्वानंतर्यमितिबोध्यं।वैदिकपरिगृहीतत्वंस्मृतीनामपिबोध्यं।ननुचो
दनासूत्रेविधीनामेवप्रामाण्यप्रतिज्ञानादत्रस्मृत्यादेरिहसंगतिरितिचोद्यंतत्परिहारंचशक्नुतमपिप्राभाकरोक्तसंगति
दूषणायस्मारयतियद्यपीत्यादिना।सोत्रचोदनाशब्दस्यधर्मप्रमाणमात्रोपलक्षणत्वाभिप्रायेणाहतथापीति।भाष्येक
थमितियमुपत्यपार्थप्रकारस्येवप्रमाणस्वरूपस्यापिजिज्ञासायाअभिप्रेतत्वादितिभावः।प्राभाकरसंगतिमनुव

२० इति षन्विति। अप्रामाण्यं स्यादिति। अतस्तत्परिहारायैव स्मृतिविचारेऽत्रेति संगतिरिति शेषः। स्मृतस्य प्रामाण्ये
वेदाप्रामाण्यप्रसक्तिमुपपादयति यामित्यादिना। रात्रिं धेनुमिवायतीं संवत्सरस्य या पत्नी सा नो अस्तु सुमं
20 गली स्वाहेति मंत्रशेषः। प्रतीयत इति। रात्रिदेवताप्रकाशकत्वादिति भावः। नन्वस्तु तत्कर्म श्रौतमेव तथा च
न स्मृत्यपेक्षत्वं तत्राह स्मार्ते चेति। अष्टकाश्राद्ध इत्यर्थः। रात्रौ कुर्मो पिंगाक्षमित्यत्र पर्यग्निकृतोत्सर्गात्वा हां
तमेत्रस्य तदंगत्वाद्व्यस्यापि श्रौतस्य प्रकरणाम्नानादिप्रापितमंत्रावरुद्धत्वादष्टकाश्राद्धांगहोमे रात्रिदेव
तामेकइत्याश्वलायनोक्तेस्तत्र रात्रिदेवतासत्वाच्च तदंगत्वमेवास्येति भावः। नन्वस्तु मंत्रः स्मार्तकर्मांगस्मृति
स्याप्रमाणं तावता कथं मंत्राप्रामाण्यमत आह तत्सापेक्षस्येति। स्मृतस्य रात्रिदेवस्य कर्मविधाने मंत्रेण तद्देव
ताप्रकाशनस्यानर्थक्यात्तद्विधानाय मंत्रस्य स्मृत्यपेक्षायां स्मृतेरप्रामाण्ये तदेकवाक्यतापन्नस्य मंत्रस्याप्यप्रा राम०
माण्यं स्यादित्यर्थः। ननु तथापि मंत्रमात्रस्याप्रामाण्यं स्यान्न कृत्स्नवेदस्य तत्राह तत्सामान्यादिति। तद्दृष्टांतेनेत २०

रत्रापि तदनुमानादित्यर्थः। स्मृत्यप्रामाण्यापेक्षत्वे दप्रामाण्यप्रसंगं ज्ञानफलमाहत्तेनेति। पं शेक्तसंगतिं दूषय
ति नैनदिति। एतत्सांगस्य मेवं प्रशेक्तरीत्या न भवतीत्येतदुपपादयति यदा हीत्यादिना। श्रुतिर्हि मंत्रस्य स्मार्त्तकर्मा
गत्वेऽप्रमाणं स्मृतिसापेक्षत्वादप्रामाण्यं स्यात्तत्रैव किं प्रमाणं मंत्रगतं शक्तिदेवताप्रकाशनसामर्थ्यं स्मृतिवच
नं वेति विकल्प्याद्येऽपि सामान्यसंबंधबोधकप्रमाणमनपेक्ष्यो नापेक्ष्य तत्राद्यं दूषयति न तावदिति। प्रकरणादि
नाऽपूर्वसाधनक्रतुसंबंधावोधने केवलशक्तिप्रकाशनेन मंत्रस्यानर्थक्यापत्तेरित्यर्थः। न द्वितीयः। तादृशप्रक
रणाभावादिति भावः। नन्वंजलिनोत्तरणापूपाञ्जुहोतीत्याद्यापस्तंबस्मृतिरूपहोमे मंत्रस्य विनियोजिकास्तु वा
चनिकविनियोगे तत्र मंत्रप्रकाश्यदेवतानपेक्षणादिति द्वितीयमाशंक्य दूषयति न चेति। नन्वध्ययनविधिरेवस्वा
ध्यापितमंत्रस्य दृष्टार्थलाभाय शक्तिदेवताकत्वेनाध्यवसायनेनोक्ते कर्मणि सामान्यसंबंधबोधक इत्यगत्यास्वीका
रे तत्र लिंगान्मंत्रस्य विनियोग इति शंकते यद्यपीति। मात्रपदेन कृत्स्नार्थानगतिक्रमप्रकरणाद्यभाव उक्तः। दूषयति

२१ तथापीति। फलशब्दोऽधिकारपरः। साधिकारत्वे नहि निरधिकारस्य विनियोगो वाच्यः स च नात्र संभवतीत्य
र्थः। किंच मंत्रस्याप्रामाण्येपि न तावताह्नत्वं वेदाप्रामाण्यमित्यभ्युपगमवादेनाह सत्यपि चेति। यदुक्तं तत्सामा
4 न्यादितरत्रापि तथात्वमिति तत्र किं तत्सामान्यं वेदत्वमुताप्रामाण्यसापेक्षत्वं नाद्यः आत्माश्रनित्योद्व्यत्वाद्वव
दिति व्यवहारप्रयोजकत्वादित्याह नहीति। स्वारसिकं वेदत्वप्रयुक्तं शब्दमात्रेह्नत्वं वेदे। द्वितीयमादायाक्षिप्याद्दूष
यति अपि त्विति। परसंगतिदूषणमुपसंहरन्स्वाभिमतां तामाह तस्मादिति। पूर्वोक्तामेवाह धर्मेति। यदुक्तमत्र सो
त्रप्रतिज्ञाविरोध इति तदनूद्य सूत्रस्योपलक्षणत्वाभिप्रायं प्रागुक्तं स्मारयति न चैवमित्यादिना। आकोपाभावे
हेतुमाह तदिति। तन्मूलत्वे नस्मृत्यादेस्तदंतर्भावे नार्थवादादेः प्रामाण्यानुपलक्षणावश्यंभावादित्यर्थः। चो
दनैवेत्येवकाराभिप्रायमाह स्वातंत्र्येणेति। साक्षात्प्रमाणं तु चोदनैव नान्यदित्यर्थः। विचारमारभते तदिहेति। न राम०
तु तस्मात्तस्मृत्यादिविचारस्याध्यायसंगतत्वात्। इति विचार्यते न तु प्राभाकरवत्स्मृतिद्वारा वेदप्रामाण्यं विचार्यते २१

इत्यर्थः। पुंसां मन्वादीनां। ननु मन्वादयः स्वयं धर्मव्यवस्थापकाः कथमनृतं वदेयुरत आह भ्रांतीति। आदिना प्रमा
दः। संभावनया मूलकल्पने चोदनैव स्मृतिमूलं किं न कल्प्यं तत्राह चोदनेति। स्मृतिमूलं चोदनेत्यर्थः। पुंसां प्र
माणतापरिमितवक्तृत्वाचरितत्वरूपाश्रद्धामात्रनिमित्ता आरोपितेति यावत्। अथवा पुंसां वचनाचरितेष्विति
शेषः। प्रमाणता प्रमितिकारणत्वं ननु ते भ्रमादेः साधकप्रमाणाभावेनाभावनिश्चयात्तत्स्मरणीतत्स्मृत्यादेः प्रामा
ण्यं निश्चीयत इत्याशंक्य साधकवद्बाधकस्याप्यभावाद्भ्रमादेः संभावनायां न प्रामाण्यनिश्चय इत्याह संभवदिति। निर्वि
चिकित्सं संशयानास्कंदितं यथा तथा त्वध्यवसानं सम्यग्द्रि·श्रेतुं शक्यं कदाचिद्द्वैत्वननुसंधानदशायां निश्चितमपि
पश्चात्संशयास्कंदितं भवतीत्यर्थः। नन्वप्रामाण्यसंशयादहत्कस तत्प्रामाण्यस्य न काचित्क्षतिरित्याशंक्यानुष्ठान
लक्षणप्रामाण्याप्रतिरेव क्षतिरित्याह तत्रेति। किंच पौरुषेयवचनप्रामाण्यस्य मूलप्रमाणसापेक्षत्वात्तदनि
रूपणेऽप्रामाण्यमेवस्त्वध्यवसानमित्याशयेन किं तत्प्रामाण्यं प्रत्यक्षादिमूलत्वेनागममूलत्वेन वेति विकल्प्या

२२ यं दूषयति किं चेति। एवं ह्यस्मत्साचाराणां ह्यतीन्द्रिये प्रत्यक्षस्याप्रवृत्तेस्तदधीनसंबंधग्रहापेक्षस्यानुमानादेः
22 श्रुतत्वं नत्वाप्रवृत्तेरनुपलब्धेश्चाभावैकगोचरत्वादिति भावः। पौरुषेयत्वादेव वेदस्य मूलानपेक्षत्वं नैवाशंक
नीयमित्याह न स्यात्तं श्रोतोति। द्वितीयं दूषयति न चोदनेति। अनुपलभ्यमाना एव मूलं किं न स्युरित्यत्राह नहीति। ज्ञान
स्यैवयार्थस्य बोधकत्वनियमादिति भावः। अनुपलभ्यमानत्वमप्रसिद्धमित्याशंक्य तदुपलंभव्यापकस्योच्चारण
स्याभावान्न ह्याप्यस्योपलंभस्याप्यभाव इत्याशयेनाह न चासामिति। व्यापकाभावोप्यसिद्ध इत्यत आहोच्चार्यमा
णात्वेवेति। वैयर्थ्यमिति। प्रत्यक्षचोदनात एव तदर्थानुष्ठानसिद्धेरिति भावः। ननु स्मृतिभिः स्वकाले चोदना उ
पलभ्यैव स्मृतिः प्रणीतास्ता इदानीमुत्सन्नाः न च प्रणयनस्य वैयर्थ्यमिदानीतनार्थत्वादित्याशंकां दूषयति
प्रागित्यादिना। किमिति। किं कृत्स्नाया एकस्याः शाखाया एवोत्सादः किं वा पठ्यमानासु शाखासु तत्तद्वाक्यस्ये रा.म. २२
त्यर्थः। एकशान्तं एकाधिकारान्तं बाह्वृचं बह्वृचाः ऋग्वेदिनस्तेषामाम्नानं। स्वपकापाठे बाह्वृचमेव बाह्वृचं स्मार्त

क्तीति। स्मृतिमूलचोदनेत्यर्थः। आयं व्युदस्य द्वितीयं दूषयति नापीति। अध्येतॄणां प्रवाहविच्छित्त्यासत्त्वाद्वा प्रमादे
न तदुत्सादः स्यान्न चैतदुभयमपि साहसिकस्य हीरोति। उत्सन्नमूलत्वं निरस्य विप्रकीर्णमूलत्वं दूषयति न चेति। उ
त्सन्नविप्रकीर्णमूलत्वद्दूषणमुपसंहरति तत्तन्नावदिति। प्राभाकरपक्षं दूषयति नापीति। अथेति। अस्मदादीनां
मनुस्मृतिलिंगेन स्मृत्यनुमानं मन्वोऽपि दृष्टमनुस्मृतिलिंगेन तस्याप्येवमन्यास्मृतिलिंगेनेति न कस्यापि स्म
तिप्रत्यक्षमिस्यथ परंपरयो यदि दृष्टो लभ्यादिवन्न स्मृतिः सिद्ध्येदित्यर्थः। तदेवाहयाहीति। प्रत्यक्षमोगस्य यो लभ्यादेः स
र्वप्रत्यक्षाप्रसरे स्मादस्मत्त्वं निसानुमेयस्मृतेः प्रत्यक्षमोग्यत्वादनुमानेकपरंपरयाप्यस्तित्वसिद्धिरिति शंकते नन्वि
ति। सर्वेषां मनुवृद्धमनुप्रभृतीनां। लिंगादीति। आदिनावाक्यप्रकरणस्थानसमाख्यानां सामपि श्रुतेर्वकल्पना
द्वाराः स्मृतिकल्पकत्वाविशेषात्। अत्रानुमानेऽर्थापत्त्या लिंगादिभिः स्मृतिकल्पनस्य दृष्टांतीकरणमनुमानार्थापत्त्यो
रेकाभिप्रायेणाथवा नीद्धियप्रतिगमकत्वमात्रे दृष्टांतः अन्यथास्तित्वतानन्यथास्तित्वताभ्यां वैषम्येणापरिहरति विप

२३ 23 मइति। उपन्यासोद्दिष्टां— क्तिः। स्फूर्तिमंतरेणानुपपद्यमानाः सर्वपुरुषप्रत्यक्षा इत्यन्वयः। तेन रूपेण सर्वैः प्रमि-
ता इत्यर्थः। तथा च स्फूर्तेरेव धर्मस्वतः प्रमाणतां तां विनानुपपद्यमाना अनन्यथासिद्धा सा तस्यां निश्चयमादधति
तां कल्पयंतीति यत्तद्युक्तमिति योजना। पुंवाक्यस्य तु वाक्यार्थज्ञानमात्रकार्यत्वात् स्फूर्तिं विनानुपपत्तिरतोन्यथा-
सिद्धत्वान्न स्फूर्तिकल्पकत्वेनासाहस्यतीति। कीदृशार्थविषयास्फूर्तिः कीदृशां तां तत्कल्पयतोऽकस्य कल्पनाप्रकार इत्यत्रा-
हास्फुटे केति। इतिर्हितौ वेदे सत्त्वसंबध्यते नूनमित्युत्प्रेक्षायां। अयं मन्त्री वेद जानातीत्यन्यथा तदर्थकवाक्यरचनानु-
पपत्तेरिति भावः। इयत्तेनावदिति। इति एवंप्रकारेण एतावत् अदृष्टकाकर्तव्यताज्ञानमात्रं एतावदित्यस्य अवछेद्यमा-
हनस्फूर्तीति। स्फूर्तिं विनास्मत्तेरनुपपत्त्यभावादिति भावः। अथ वा प्राभाकरमते पुंवाक्यस्य वक्तृज्ञानानुमापकत्वेनैव प्रा- सम०
माण्यात् तदेव प्रथममनुमीयत इत्यर्थः। ननु प्रथमं स्फूर्तिकल्पनाभावेपि स्फूर्तिज्ञानकल्पनात् ज्ञानस्य च सविषयत्व- २३
नियमात् स्फूर्तिसिद्धिरित्यत आह नापीति। अनुपपत्त्यभावस्य तुल्यत्वादिति भावः। ननु मा भूत् प्रथमं स्फूर्तितद्ज्ञानयोः क-

ल्पनास्मर्तुरर्थज्ञानकल्पनानंतरं तत्त्वर्थज्ञानहेतुतयाक्लृप्तिकल्पनमवश्यंभवेदित्यत आह एवमिति। ज्ञेयेति। ज्ञानस्यज्ञे
यं विनानुपपन्नेरिति भावः। नन्वस्माकं क्लृप्तिर्द्वाविस्मर्तुर्मनोईदृष्टमनुस्मृतिलिंगे न क्लृप्तिसिद्धिरित्याशंकामाम्य
माह एवं स्मृतीति निश्चप्रमाणिके ति। क्लृप्तिकल्पकप्रमाणानां त्विति क्लृप्तेरनपेक्षितत्वादित्यर्थः। ननु मूलप्रमाणनिश्चयं
विना न परकीयज्ञानमात्रादर्थनिश्चयः अंततो ज्ञानमपि परकीयं न सिद्ध्येदर्थगोचरव्यवहारस्यासंसर्गाग्रहादपि सं
भवादतो मूलक्लृप्त्यपेक्षास्तीति शंकाते अत्रैवेति। ननु मनोऽर्थज्ञाने मूलं दृष्टमनुस्मृतिरेवण्यादिति न क्लृप्तिसिद्धिरत आ
ह नन्वेति। तत्र मूलानुसंधानापेक्षा पांसस्ता।ऽसंभावयेदिति। नदेतिशेषः। नदपि स्मरत्यंतरमपि दृष्टमनुस्मृतिरित्यर्थः। अ
पि मनुस्मृतिदृष्टांतार्थः। ज्ञानस्य दृष्टमनुनिष्टस्य। नार्थस्येति। मूलानिश्चयादित्यर्थः। पूर्ववत्तरं दृष्टमनोऽर्थज्ञानमूलं ज्ञान
स्य दृष्टमनोऽर्थज्ञानस्य। क्लृप्तिरेवेति। क्लृप्तेरर्थज्ञानाजन्यत्वेन मूलानपेक्षत्वादिति भावः। क्लृप्तेः स्वविरचनहेतुज्ञानमू
लानपेक्षत्वेपि त्वत्पक्षे स्वविषयज्ञानमूलानुसंधानापेक्षतादुक्तदोषसाम्यमिति परिहरति क्लृप्तावपीति। मूलतया ऽर्थ

२५ ज्ञानमूलतया। नस्मृतिसद्भाव इति। स्वरूपसत्त्वेऽर्थज्ञानाहेतुत्वादिति भावः। स्वव्यांहृतिमजानानः शंकते स्मृतिवि

25

षयेत्यस्त्विति। तामेव दर्शयन्नुत्तरमाह पर ज्ञानेनेति। अपेक्षेति। त्वदुक्तरीत्येति शेषः। तथा चेदानीं तत्त्यागे स्वव्याह

तिरित्यर्थः। तथापि कथमुक्तदोषसाम्यं तत्राह मूलं चेति। स्मृत्यंतरमेवेति। निस्यानुमेयस्मृतिज्ञानस्य प्रत्यक्षमूलत्वा-

संभवान्मूलांतरस्याप्रसक्तेः पारिशेष्याद्यथास्मार्कं स्मृतिप्रमानार्थकस्मृतिज्ञाने स्मृतिरेव लिंगविधया मूलं। तथा स्मृ

तिकारस्यापि मनोस्मृतिज्ञाने हेतुमनुस्मृतिलिंगविधया मूलंमेवं तत्पूर्वं पूर्वस्येति नस्मृतिसिद्धिरित्यर्थः। अर्थज्ञा

नद्वारेणेति। स्मृतिरूपकार्यलिंगेन तद्धेतुमर्थज्ञानं कल्पयितानेन तद्धेतुस्मृतिज्ञानं कल्प्यत इत्यर्थः। क्वचित्कल्पना

वस्थायां कस्यचित्पुंसः अपि क्वचिदित्यनेनापि संबध्यते। नन्वेवं लिंगादिभिरपि स्मृतिज्ञानमेव सिद्ध्येन्नस्मृतिरित्याशं

कतेषां स्वतः प्रामाण्याभावाच्छ्रुत्येव विनानुपपत्तिर्नस्मृतिज्ञाने न विना नित्यवेदधर्मत्वेन ज्ञानकार्यत्वाभावादिति प्राग् राम•

क्तेर्वैषम्यं स्मारयति लिंगादीनित्विति। यदि स्मृत्यसिद्धिभियामूलानुसंधानं विना स्मृतिज्ञानेनैव स्मृतिनिश्चयः स्वीका २५

र्यस्तदा दोषमाह तेनेति। स्वतःसिद्धिप्रसंगेनेत्यर्थः। तन तत्तदा अर्थस्मरणेति। यथास्माकं स्मृतिलिंगकल्पितेन मनु
निष्टार्थज्ञाने नार्थस्यैव निश्चयो न स्यादिति निश्चयस्तथा मनोरपि स्मृत्यंतरकल्पितेन च हृद्भ मनुनिष्टज्ञाने नार्थस्यैव निश्चय
एवं पूर्वपूर्वस्येति न कश्चिदपि स्वतःसिद्धिरित्यर्थः। ननु ज्ञाने नैवार्थनिश्चयात् तदर्थं मूलानुसंधानानपेक्षायामपि स्वतः
स्मृतिकर्तुरर्थज्ञाने किंचिन्मूलं वाच्यं तत्राह तत इति। इष्टापत्तिरिति। तदस्य शंकायामाह अन्येति। ननु प्रत्यक्षयोग्यत्वायोग्य
त्वाभ्यां वैषम्यमुक्तमित्यस्वरसाच्चेदाह चैत्येति। एतद्विधा मूलानुसंधानापेक्षायां गुरुदोष इत्याह अन्येति। अन्यस्येति। स्मृतिस
द्भावमूलं मृग्यत इत्येतिर्योऽयं। उभयथा मूलानुसंधानसापेक्षत्वे तदभावे चाप्रवृत्त्वं पक्षमुपसंहरति अत इति। उत्सन्नविप्रकी
र्णीति स्मानुमेयस्मृतिमूलत्वासंभवादित्यर्थः। स्मृतीनां वेदमूलतेति प्रतिज्ञातत्र हेतुः संभवेति। संभावं संभावयितुं शंकते वे
द एव मूलं यथा स्तुतात्वादिति। ननु भ्रांत्यादिमूलत्वस्यापि संभवात् संदिग्धोऽयं हेतुरित्याशंक्य तन्निश्चायकमाह पूर्वार्द्धेन वे
दिकैरिति। वेदोक्तमेव धर्मत्वेन स्वीकुर्वद्भिः स्मर्यमाणत्वात् अत्र स्मृधातुः पाकं पचतीत्यादाविव क्रियासामान्यकरोत्यर्थ

२५ 25 कः निबध्यमानत्वादिति यावत्। न हि वेदोक्तमेव धर्मत्वेनाध्यवस्यन्तो वेदानुक्तं धर्मत्वेन स्मरन्त्यतो वेदमूलत्वमेव संभा
वितमित्यर्थः। कैश्चिद्वैदिकैः स्मर्यमाणत्वेपि वैदिकान्तरैरपरिग्रहे वेदमूलत्वेनास्मरणाद्वा वेदमूलत्वासंभावना स्यान्न
तु तदस्तीत्याह तत्परिग्रहदार्ढ्यत इति। तच्छब्देन वैदिकत्वसामान्येन स्मर्तृभिन्नाः स्मृत्यर्थानुष्ठातारस्तद्वैदिकत्वस्म
र्तारश्च परामृश्यन्ते तेषां वैदिकानां परिग्रहोर्थानुष्ठानं तद्दार्ढ्यं च वैदिकत्वस्मरणं ताभ्यां पंचम्यास्तसिल्। ततश्चोक्तहे
तुत्रयेण वेदमूलत्वस्यैव संभाव्यमानत्वात्तदपवादकस्य चाभावाद्वेदमूलत्वसिद्धिरिति न भ्रमादिमूलत्वं नाप्यनुष्ठा
नलक्षणमप्रामाण्यमिति भावः। श्लोकस्याद्यं पादं व्यतिरेकमुखेन व्याचष्टे य एवेति। आस्थिताः वेदोऽखिलो धर्ममूल
मिति प्रतिज्ञातवन्तः। वेदमूलतेति। अष्टकादिस्मृतीनामित्यादिः। न स्यात्संभाविता न तस्मात् यदि तदा नोपपद्यत इति पो
जनाद्वितीयं व्याचष्टे तथेति। अविगीता अनिन्दिता। पुरुषपरंपरा तया परिग्रहोऽर्थानुष्ठानं। दार्ढ्यं यदस्य व्याख्या वैदिक राम०
त्वस्मरणमिति। अनुष्ठानस्य तात्कालिकत्वेपि वेदमूलत्वनिबंधनस्य चिरतरस्थायित्वान्न स्मृतीनां दार्ढ्यमिति भावः। २५

।असतिश्रुसंभाविते। ननु मन्वादीनां वैदिकत्वे सति सर्वमेतत्स्यान्न देवदत्तादिग्रन्थमित्याशंकामपाकुर्वंस्तृतीयं व्या
चष्टे संभवति चेति इति। हेतोसंभाव्यवेदमूलत्वादित्यर्थः। चतुर्थं व्याचष्टे तदिति। स्मृतीनामित्यादि। केचित्तु वेद
मूलत्वप्रतिज्ञायां संभाव्यवेदमूलत्वहेतोर्भ्रान्तिमूलत्वसंभावनाप्रतिरोधादसाधकत्वमाशंक्य तत्साधकहेतुप
रत्वेन पूर्वोक्तं व्याचक्षते ननु स्मृतिमूलभूतो वेदो नान्यप्रतीतेरप्रतीतमस्तेचाऽबोधकत्वान्न तन्मूलतेतिशंकते
कथमिति। ननूच्चार्यमाणत्वे स्मृतिप्रणायनवैयर्थ्यमुक्तं तत्राह विप्रकीर्णत्वादिति। लिंगादीनामपौरुषेयत्वयो
च्चारणानिरपेक्षस्मृतिस्वरूपकल्पनेनाप्यनुपपत्तिर्णान्तेर्निसानुमेयपक्षेति मूलत्वमंगीकृत्य नमिहत्वनुच्चारितस्य
मूलत्वासंभवाद्विप्रकीर्णशाखामूलत्वमिति वैयर्थ्यं तद्वाखाध्यापि वैयर्थ्यवत्त्वमाहोपलंभेपीति। अनुपसंह
रणीयानां उरवगमार्थनिमुपसंहारोऽर्थावगमः। न वैयर्थ्यमिति। अन्यथा अग्निहोत्रादिप्रसक्तेति मूलस्मृ
तिप्रणायनस्यापि वैयर्थ्यापत्तिरिति भावः। केचित्तु उपलंभेपि मेधावतां शाखान्तरस्योपलंभेपि मंदधीभिरुपल

२६ 26 त्तु मशकानामष्टकादीनामुपलंभः फलमिति व्याचक्षते। स्तुत्वेव धर्मस्य वेदैकप्रमाणकत्वाद्वेदरहितं स्मृत्यादिकं प्रमा
णत्वेनानपेक्ष्यं स्यात्॥ ॥विरोधे॥ आपवादिकीं संगतिमाह उत्सर्गस्येति। उत्सर्गतः प्रामाण्येत्यर्थः। बाधकापनोदो नि
यम उत्सर्गः। तत्र श्रुत्या स्मृतिप्रामाण्यमपोद्यते इति तद्विषयपूर्वाधिकरणसिद्धं प्रामाण्यं फलतीति भावः। प्रत्यक्षेति
। औदुंबरीं स्पृष्ट्वोद्गायेत् जातपुत्रः कृष्णकेशोऽग्नीनादधीत ताम्रीं बीजमीये संस्थिते यजमानस्य गृहे शितव्यमित्यादि प्रत्य
क्षश्रुतिविरुद्धा औदुंबरी सर्वा वेष्टयितव्या अष्टाचत्वारिंशद्वर्षाणि ब्रह्मचर्यं चरेत् क्रीतराजको भोज्यान्न इत्यादि स्मृतीत्यर्थः
। औदुंबरी नाम ज्योतिष्टोमसदोमंडपमध्ये निखन्यमानो डुंबरकाष्ठस्थूणा। पूर्वाधिकरणं पूर्वाधिकरणसिद्धांतयुक्तिः
पूर्वपक्षः पूर्वपक्षयुक्तिः। ननु पूर्वत्र मूलश्रुत्यनुमानेन स्मृतीनां प्रामाण्यं साधितं न चात्र तत्संभवस्तत्कथमत्र
पूर्वसिद्धांतन्यायइत्याशंक्य निषेधति न चेति निषेधे हेतुः द्वयेति। स्पर्शनसर्ववेष्टनश्रुतिद्वयेत्यर्थः। युगपदित्युद्व रा०म०
तदर्थानुष्ठानमशक्यमित्याशंक्य विकल्पेन सुशकमित्यभिप्रेत्य तादृशश्रुतिसंभवे दृष्टांतमाह ब्रीहीति। ननु प्र २६

त्वसेरणस्पर्शनविधौ ममीयमाणो कथं तद्धि हृद्वासर्ववेदनक्षतिरनुमीये तन्न हि वन्हावौष्ण्यप्रत्यक्षी क्रियमाणोऽशै
त्यमनुमातुं शक्यं ब्रीहि पवक्ष सोक्त हृयोरपि प्रत्यक्षत्वान्न दृष्टांतनेसाशंकावन्हावोष्ण्यशैत्ययोर्वक्तृत्वेन विकल्पे
नाप्यसंभवादास्त्वंतिको विरोधः इहतु अक्षसोर्नसाक्षाद्विरोधः किंत्वर्थद्वारात त्वसवानुष्टेयस्य विकल्पयोग्यताहेतुकल्पि
कार्थकत्वेनोभयसंभवेनुहृपएवदृष्टांतरइत्यभिप्रेत्याहयत्रहीत्यादिना भिराकर्तुमित्यंतेन। द्वयोर्विषययोः। असंभ
वइति। विकल्पेनापीत्यादिः अपहारादभावबोधनात् अनायासेन साक्षान्नतु व्यभिचार्यादाविवव्याप्तिज्ञानपरामर्शा
दिविघटनद्वारा। सामान्यतउक्तमुदाहरति वन्हाविवेति। औष्ण्यप्रत्यक्षेणोऽस्याध्याहार्या। प्रकृते तद्वैषम्यमाह यत्र त्विति
। द्वयेति। स्पर्शनसर्ववेदनक्षतिद्वयेत्यर्थः। वैकल्पिकार्थकत्वेनत्यादिः बाध्यबाधकतायाविषयसंभवासंभवाये
वतत्त्वं नशेषग्रमांघेइत्यभिप्रेत्योक्तं शीघ्रप्रवृत्तमपीति। इतरत् स्पर्शनक्षति प्रत्यक्षं इतरत् अनुमानस्य विषयं सर्ववेद
नक्षतिं। तद्द्विषयं सर्ववेदनक्षतिविषयकं। नन्विदमपिवन्ह्योष्ण्यादिवदसंभावितमेवेत्याशंक्य वैकल्पिकार्थकत्वेनसं

२७ भवसोक्तत्वान्मे वमिस्माहसंभवतिचेत्। चश्चोद्यव्यावृत्त्यर्थः। अत्रपूर्वोक्तेनसहान्यानपिदर्शतानाहव्रीहीति। यथाद
27 र्शपूर्णमासयोर्व्रीहिभिर्यजेतयवैर्यजेतेतिश्रुतिद्वयंस्वस्वविषयस्येतरानिरपेक्षतयासाधनताबोधकत्वेनयुगपदन
नुष्ठेयार्थकंज्योतिष्टोमेवृहत्पृष्ठंभवतिरथंतरंपृष्ठंभवतीतिश्रुतिद्वयंपृष्ठस्तुत्योर्विकल्पवचनानुरोधाद्युगपदन
नुष्ठेयार्थकं। अतिरात्रेषोडशिनंगृह्णातिनातिरात्रेषोडशिनंगृह्णातीतिश्रुतिद्वयंभावाभावयोरेकस्मिन्प्रयोगेअ
समावेशाद्युगपदननुष्ठेयार्थकंतद्वदित्यर्थः। सोपपत्तिकोक्तमुपसंहरतिइतिप्रसक्तेरोति। इतिहेतोरुक्तप्रकारैरि
त्यर्थः। यदुक्तंबाध्यबाधकभावेसंभवासंभवाववतंत्रंनशेषप्रमाणेइतितस्यअभिचारंशंकतेकथंनहीति। क्रम
यापिशीघ्रप्रवृत्ततयापिश्रुत्यपेक्षत्वात्। अयमर्थः। शेषलक्षणोक्तश्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानांसम
वायेपारदौर्बल्यमर्थविप्रकर्षादितिसूत्रेश्रुत्यादिप्रमाणेषुपूर्वपूर्वैरुत्तरोत्तरस्यबाधउक्तः यथाअग्निचयनप्रक राम.
रणेपठितः कदाचनस्तरीरसिनेंद्रसश्चसिदाशुषेइतिमंत्रः ऐंद्र्यागार्हपत्यमुपतिष्ठतइतिप्रसक्तश्रुत्यागार्हपत्योप २७

स्थानशेषतया प्रतीयते इदं द्रुप्रकाशानसामर्थ्यरूपेणानुलिंगे तेंद्रोपस्थानशेषतया तत्र लिंगस्य श्रुतिं विनियोजकत्वा नावि
भावाद्यावत्तच्छ्रुतिकल्पपतिनावत्क्रमयाश्रुत्या लैंगिकाश्रुतिकल्पनं बाधिता स्वविषये मंत्रो विनियुज्यते तत्कस्य हे
तोः श्रुतेः शीघ्रप्रवृत्तत्वात् त्वन्मते तु तत्रापि विकल्पादिनो मयश्रुत्यर्थानुष्ठानसंभवात्क्रमयापि श्रुत्या कल्प्या नबाध्येत
अतस्तत्र सत्यपि तत्संभवे श्रुतिशीघ्रादेव बाधदर्शनात्त्वदुक्तनियमस्य तत्र व्यभिचारः एवं लिंगादिनावाक्यादिबाधेपि व्य
भिचारो द्रष्टव्य इति। उक्तं व्यभिचारमुद्धरति उच्यत इति। द्विविधो हि लोके प्रत्यक्षेणानुमानस्य बाधः एकत्वावत्प्रमेयाप
हारात् यथा वह्न्यात्वोष्ण्यप्रत्यक्षेणाशैत्यानुमानस्य द्वितीयस्त्वनुमितिसामग्रीविघटनेन यथासिद्धसाधनस्थले प्रत्यक्षदृ
ष्टेकरिणि। तयोराद्यो बाधो मुख्यो द्वितीयस्तु गौणः। मुख्ययोरेव च बाध्यबाधयोः संभवासंभवतंत्रत्वनियमः तत्र श्रुति
लिंगादिस्थले पूर्वस्य शीघ्रप्रवृत्त्या किमुत्तरस्य प्रमेयापहारः क्रियते उतानुमितिसामग्रीविघटनं नाद्य इत्याह नेव तत्रे
ति। श्रुतसंश्रुतिप्रत्यक्षेण कल्प्यश्रुतेरभावबोधनात्तस्य स्वशेष्यप्रमुख्यबाधात तत्रतान्नोक्तनियमव्यभिचार इति भा

२८ वः। द्वितीयस्त्विह इत्याह किं त्विति। कल्पनामूलत्वं स्मृतिसिसाधयिषाकृतस्तदुच्छेदो वीजाभावादिति वक्तुं स्मृतिसि-
साधयिषायां वीजमाहयावद्वीति। आम्नानं प्रकरणे पाठः प्रकरणं प्रधानं कर्मस्वकृतार्थः स्वलक्षणोपकारः स्मृति-
कल्पनं मंत्रप्रकरणेति। नोः परस्परशेषशेषिभाववोधकस्मृत्यनुमितिः प्रमाणत्वात् इष्टत्वेन प्रमितं। मंत्रपाठस्य प्र-
योजनाकांक्षाप्रकरणेन उपकाराकांक्षा चोक्तस्मृत्यनुमित्या वीजमित्यर्थः। वीजमुक्त्वा तदभावेऽनुमित्याभावा-
दनुमित्यभावमाहयदात्विति। ल्कृपपाठेंऽयागार्हपत्यमित्यनया। द्वयोर्मंत्रप्रकरणेनोः नैराकांक्ष्यं शेषशेषिभाववो-
धनेनोक्ताकांक्षाद्वयशांतिः मूलोच्छेदात्। अनुमितिमूलस्मृतिसाधयिषोच्छेदात्। आकांक्षाधीनेति। आकांक्षाहेतुकस्मृतिसा-
धयिषाधीनेत्यर्थः। नन्वेवमपि वप्रकृतेय्योर्दुर्वर्णाल्कृप्तस्मृतिवोधितस्पर्शनसंस्कारेणाकृतार्थता तस्मान्नैस्मृत्यनुमित्या-
विघटनरूपो गोरा एव वाध इत्याशंकावैषम्येण परिहरति अत्र त्विति। न त्वत्रोऽर्द्वयोः कृतार्थता यस्मृत्यनुमितिरुच्यते एम० २८
किं तु स्मृतेः पौरुषेय्याः स्वविरचनमूलत्वात् पेक्षतालिंगस्य तु न मूलापेक्षेति वैषम्यमिति भावः। एवं स्विसाधयिषाविघ-

रनेनिरस्ते प्रमेयापहारादेवात्र बाधः संभाव्येत तच्च न संभवतीत्याह यदि परमिति । यदीति संभावनायां प्रमेयाप
हारस्य विरुद्धत्वे यदि निरोधः संभाव्यते न चैवं चस्त्वर्थः एतदेव स्फुटयति ननूक्तं स्मार्तप्रत्यक्षयोरित्यादिनोक्तमिति सं
तेन । एवं प्रत्यक्षानुमेयश्रुत्योरर्थविरोधेऽपि न श्रुत्यनुमानबाध इत्युक्तमिदानीं तयोरर्थविरोध एव नास्तीत्याहाथवे
ति । श्रुतिः प्रत्यक्षश्रुतिः स्मृतिः स्मार्तश्रुतिस्तयोः प्रमेये इत्यर्थः । ननु प्रवर्तनयोः श्रुतिद्वयार्थयोरस्त्येव विरोध इ
त्याशंक्य न प्रवर्तनाशास्त्रार्थः किं तु शक्तिः साध्यफलोपधानाभावेऽपि संभवतीत्याशयेनाविरोधमुपपादयति न ही
ति । व्रीहिशक्तिः व्रीहीणां पुरोडाशस्य तद्द्वारा यागस्य वा निर्वर्तनशक्तिः एवमग्रेऽपि । ननु प्रवर्तनाशक्तिर्वा शास्त्रार्थ इ
त्यत्र किं विनिगमकमित्याशंक्य व्रीहियवादिश्रुतीनामविरुद्धार्थकत्वलाभ एवेत्याशयेनाह शक्तिमात्रमिति । पूर्व
पक्षमुपसंहरति तदिति । प्रत्यक्षेण स्पर्शनश्रुत्या अनुमानस्य अनुमेयवेदश्रुतेः । विरुद्धनामपीति । पूर्वकल्पाभिप्रा
येणापातप्रतीत्यभिप्रायेण वा । प्रवर्तनैव शास्त्रार्थ इत्याशयेन सिद्धान्तमाह शास्त्रमप्रमाणमिति । विरुद्धानां श्रुतिस्मृतीनां

२९ 29 मध्येऽन्यतरप्रामाण्यमित्यर्थः। नन्वौडुंबर्यामवच्छेदकभेदेनोद्गाता स्पर्शनं वा समावेष्टनं च तुशाकमित्यत आह औ
डुंबरीमिति। वेष्टनसंकोचकप्रमाणाभावादिति भावः। वेष्टितायाउपरि स्पर्शः प्राप्यत्त आह वेष्टितां देति। व्यवधाने
मुख्यः स्पर्शशास्त्रार्थो न स्यादिति भावः। फलितमाह स्पर्शनत इति। बाध इत्यनेनान्वयः अप्रामाण्यविधानादित्यर्थः। तत्र हेतुर
न्योन्यविरोधत इति। परस्परविरुद्धार्थकत्वादित्यर्थः। अत एव विरुद्धानामित्यस्य हेतुगर्भविशेषणत्वं सूचितं। एवं च
सामग्रीविघटनेन बाधासंभवेपि विषयापहारे बाधः स्यादेवेत्यर्थः। नन्वनुष्ठानाशक्तिः पुरुषस्यैव दोषो न तु शब्दबोधय
तः शास्त्रस्य तदत्रोभयप्रामाण्ये पपन्नेन्यतरप्रामाण्यमित्याशंकामपनुदन् श्लोकं व्याचष्टे अशक्तेति। मूर्द्धाभि
षिक्तं पद्माभिषिक्तो राजेव सर्वजनप्रसिद्धं। प्राक्सुपदिशदेव वाक्यं प्रमाणमन्यथा तदुपदेशवैफल्यादिति भावः। न
हि सत्प्रतिपक्षवत्परस्परप्रतिबंधादुभयाप्रामाण्यं स्यादित्याशंक्याह अबाध्यमिति। पौरुषेयापौरुषेययोस्तुल्यबलत्वा एम० २९
भावान्न केहि न सत्प्रतिपक्षवत्पौरुषेयमेव बाध्यमिति भावः। एवं च न तेनाशास्त्रार्थ इति पक्षे स्यादेवं न पक्षांतर इति शं

कृतेनेति। अतिप्रसंगेन दूषयति तत्किमिति। सागरत्तरत्ना विधानमपि हनुमंतमिव कं चिद्योगिनं प्रतिपमाणमेवात
आह अग्निनेति। अग्नौ करापि सेचनफलानुपधानान्न च्छकौमानाभाव इत्यत आह तथेति। अविरोध इति। यदाहवनीये
जुहोतीति सामान्यशास्त्रस्य जुहोति होमे सोमक्रयणाः स्वनमेपदे जुहोतीति विशेषशास्त्रविरोधो न स्यात्पदहोमेप्याहवनी
यस्य प्राप्तिसद्भावादित्यर्थः। सामान्यशास्त्रस्य विशेषशास्त्रेण बाधस्तस्य ततो दुर्बलत्वान्न तु विरोधान्नत्राहावि[illegible]स्येति
। अन्यथा प्रकरणोत्कमस्येन मंत्रादेर्लैंगिकविनियोगो न स्यादिति भावः। श्रुतिलिंगादिन्यायेन त्वनुमितस्य विघटनेन श्रु
त्यनुमितिनिरोधरूपो बाधो नैवाशंकनीय इत्याह न चेति। इवेति व्यतिरेकदृष्टांतः। तत्र हेतुमाह सामान्येति। श्रुतिकल्पनाप्र
सक्तेरेवाभावादिति भावः। ननु होमसामान्यस्याहवनीयरूपाधारसंबंधे आहवनीयशास्त्रस्य प्रत्यक्षत्वेन लक्षणत्वेपि पदहोम
रूपविशेषस्य तत्संबंधे लक्षणत्वाभावात्सामान्यस्य च विशेषं विशेषं विना नुष्ठानापर्यवसानाद्विशेषाकांक्षितत्वात्तत्सं
बंधबोधकश्रुतेः कल्पनीयत्वेन प्रसक्तौ लक्षणेन पदशास्त्रेण तदाकांक्षाशांतस्तन्निरोधादयमपि मूलाकांक्षोच्छेदकत्वए

३० वचाधइत्याशंक्याह तन्मात्रेणेति। सामान्ये प्रत्यक्षमात्रेणेत्यर्थः। न निर्विशेषं सामान्यमिति न्यायेन पदहोमातिरिक्तहो
मरूपविशेषाणामिव पदहोमरूपविशेषस्याप्याहवनीयसंबंधे आहवनीयशास्त्रस्य प्रत्यक्षत्वान्न दंशेन स्मृतिक 30
ल्पनाप्रसक्तिरिति भावः। प्रमेयेति। पदाहवनीययोरुभयोरपि युगपदाधारत्वविरोधादित्यर्थः। विशेषस्य शीघ्रप्र
वृत्तत्वेन स्वार्थेनुष्ठापिते सामान्यशास्त्रस्य तदंशेननुष्ठापनमात्रं न तु शक्तिरूपप्रमेयापहार इत्यरुचेराह एवमिति
। तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षेति यागोत्पत्तिसमय एव शिष्टयामिक्षया वाजिभ्यो वाजिनमिति तु सत्त्रे
पागेपश्चाद्विहितस्य वाजिनस्य बाधेन स्यादित्यर्थः। ननु तत्राप्युत्पत्तावेवावगतया आमिक्षया द्रव्याकांक्षाशांत्यैव बा
धेन प्रमेयापहारादित्यरुच्याह नित्ये इति। सप्तदशानुब्रूयाद्वैश्यस्येति वैश्यनिमित्तेन सामिधेनीसाप्तदश्येन नित्यस्य त रा.म.
स्यां च दशस्य बाधेन स्यादित्यर्थः। आदिशब्देन सावकाशनिरवकाशादिसंग्रहः। फलितमाह तस्मादिति। शक्तिशास्त्रार्थ ३०
नायाञ्चतिप्रसंगदुष्टत्वेन प्रवर्त्तनाया एव शास्त्रार्थतात्स्यहानिपर्यायानुष्ठानाशक्तौ शास्त्रयोर्विरोधेनान्यतराप्रामा

र्यं स्यादेवेत्यर्थः। अपि चेद्यत्र शक्तमित्येनावतापवृत्तस्य दर्शनाच्छक्तिवादिनापि विधेः प्रवर्त्तकत्वाय शक्तगोचरप्रव
र्त्तनैव विध्यर्थो [illegible] वाच्यः। ततो वरं लाघवात्प्रवर्त्तनैव विध्यर्थ इत्याह किं चेति। ननु प्रवर्त्तनाया विध्यर्थत्वेपीष्टसा
धनताशक्तत्वगतिं विना प्रवृत्त्ययोगात्सापि विध्यर्थोऽस्तु पेपेसाघं कार्थिकत्वान्नैवमित्याह प्रवर्त्तनारूपो हीति। अर्था
दिति। आप्तप्रवर्त्तनान्यथानुपपत्तेरित्यर्थः। तथा च प्रवर्त्तनाया एव विध्यर्थत्वे प्रागुक्तमेव फलितमित्याह प्रवर्त्तनाचे
ति। नन्वाप्तप्रवर्त्तनानुपपत्त्येष्टसाधनताशक्तत्वगतिवदाप्तोक्तेष्टसाधनताशक्त्यनुपपत्त्याप्रवर्त्तनावगतेरिष्टसाध
नताशक्तिरेव विध्यर्थः किं न स्यादित्याशंक्याह परापीति। कन्तुरिति। अन्यथान्यकृते नान्यस्य फलं स्यादिति भावः। ततः किं
तत्राह न चेति। अशक्तो विधयो न प्रवर्त्तका इत्यत्र हेतुसम्मतिमाह यथोक्तमिति। अर्थं प्रवर्त्तकमर्थं आख्यातानां लिङा
दीनां शक्तिः कारकनिष्ठा। उपसंहरति तेनेति। अन्यतरत् पौरुषेयं स्मृतिवचनमित्यर्थः। ननु स्मृतेः पौरुषेयत्वेप्यनु
मेयश्रुतिसमानार्थकत्वाद्दष्टकादिस्मृतिवत्प्रामाण्यं स्यादित्याशंक्याह तत्रेति। उपलक्षेणास्पर्शनश्रुतिप्रत्यक्षेण अनु

३१ मानस्य सर्वे वेष्टनक्षत्यनुमानस्य। ननूक्तप्रत्यक्षेणानुमेयपक्षत्वभावावबोधनात् कथं तेन तद्बाध इत्यत आह। ग्राह्याविति
।ग्रैष्यप्रत्यक्षेणोतिशेषः। न च तदभावज्ञानवत्तदभावव्याप्यवत्ताज्ञानस्यापि तद्ज्ञानप्रतिबंधकत्वात् कैत्साभावव्या
31 प्यत्वेन गृहीतस्यैष्यस्य प्रत्यक्षेणाग्रैष्यानुमानप्रतिबंधोपयुक्तः। ननु प्रकृते तथात्वं भवति वेष्टनक्षत्यभावव्याप्य
तयास्पर्शनक्षतेर्गृहीतत्वादिति वाच्यं। प्रमेययोर्विरोधे प्रमाणयोरपि तद्वश्यंभावात् स्पर्शनं वेष्टनाभावव्या
प्यमिति वत्स्पर्शनप्रमाणं वेष्टनप्रमाणाभावव्याप्यमित्येवं रूपग्रहणे न तत्संभवात्। परमप्रकृतमुपसंहरति इ
ति सिद्धमिति। नन्वेवमुक्तरीत्या ग्रीहिक्षतिप्रत्यक्षेण यवक्षतिगोचरप्रमाणं बाध्येतेत्यत आह ग्रीहीति। द्वयोः
क्षतिगोचरप्रमाणयोर्गृह्यमाणयोर्विशेषः प्रबलदुर्बलभावोपयोगीत्वात्। एकेन। एकक्षतिविषयकप्रत्यक्षे
ण। इतरस्य इतरक्षतिविषयकप्रत्यक्षस्य प्रत्यक्षानुमानयोस्तु प्रत्यक्षप्राबल्यस्य सर्वसंप्रतिपन्नेर्वैषम्यमिति ए.म.०
भावः। ननु ग्रीहियवक्षत्योरन्यतराबाधे उभयप्रामाण्याद्युगपद्ग्रीहियवावनुष्ठेयौ स्यातां न च तच्छक्यतइतिमह ३१

त्वं करमित्यत आह विरुद्धार्थत्वाच्चेति। आंजस्येन पाक्षिकबाधं विना। ननु तर्हि ईश्वरदत्तवरदाने विप्रसरं न लभंते त्र
यावत्त्वरदक्षिमर्कंटा इति न्यायेन सर्वथा अप्रामाण्यं स्यादित्यत आह न चेति। दोषः पौरुषेयत्वकृतः। ननु कोऽयं क्लेशः
विधांतरमास्थीयतां तत्राह इति गतीति। ननु तथागतमेवाप्रामाण्यं बाधितार्थकत्वमेव हि तत्त्वस्य गामित्याशंक्यागू
ढाभिसंधिराह न चैवमिति। अभिसंधिमजानन् दृष्टांतादृष्टप्रतिपत्त्या तामेव शंकामनुवदति नन्विति। अभिसंधिं प्रक
टयन्नाह सत्यमिति। एतत्तावाधितत्वस्याप्रामाण्यं परंतु बाधे विशेषोऽस्तीत्याह नत्विति। पारमार्थिकतात्पर्यविषयः। कीदृ
शस्तर्हि बाध्यस्तत्राह किंत्विति। प्रतिपन्नस्यार्थविरोधंमकं यवशास्त्रं स्वरसतः शाब्दशक्तिमात्रात्। सार्वत्रिकः। यवीयप्र
योगसाधारणः प्रत्ययः व्रीहिशास्त्रजन्यशाब्दबोधः बाध्यते यवीयप्रयोगांशे भ्रमत्वेन निश्चीयते एवं यवशास्त्रजन्य
प्रत्ययोऽपि बाध्यः बाधफलमाह तद्बाधाच्चेति। पाक्षिकेति। व्रीहिशास्त्रस्य यवानाक्रांतविषय एव तात्पर्यं यवशास्त्रस्य
च व्रीह्यनाक्रांतविषय एवेत्यर्थः। अत एव दृष्टांतोऽपि संप्रतिपन्न इत्याशयेन सिद्धवत्कृत्याह सामान्येति आहवनी

३२ 32 यथा स्वत्रस्येत्यर्थः । विशेषेति । प्रदेत्यर्थः । स्फुलितमाह इतिनेति । नन्वेवमेवस्पर्शनस्फूर्तिवेष्टनस्फुरतोरपि पाक्षिक
पात्वेन प्रमाणत्वं किं न स्यात् तत्राह नचैवमिति । स्फूर्तिस्वरूपेति । स्वारसिकापाक्षिकार्थत्वेत्यर्थः । स्मृतेर्बाधकत्वेप्य
नुमितस्फूर्तिर्बाधिके सादृश्यानुमानानुदयं प्रागुक्तं स्मारयति । स्फूर्तिकल्पनस्येति । विरोधेन विरुद्धार्थकत्वेन वेष्टन
प्रमाणाभावव्याप्यस्पर्शनस्फूर्तिप्रत्यक्षप्रतिबद्धत्वेनेति यावत् । ननु पाक्षिकार्थकव्रीहियवादिविरुद्धस्फूर्तिदर्शना
त्तद्रूपत्यस्फूर्तेः पाक्षिकार्थकत्वेन स्मार्तस्फूर्तिसंभवशंकया स्पर्शनस्फूर्तिप्रत्यक्षस्योक्तव्याप्यत्वानिश्चयात् स्मार्त
स्फूर्त्यनुमितिप्रतिबंधइत्याशयेन शंकते नन्विति । प्रत्यक्षस्फूर्तेः पाक्षिकार्थत्वेन कथं स्मार्तस्फूर्तिसंभवो तत्राह पाक्षि
क्यस्य इति । स्मार्तस्फूर्तिसंभवस्येतरेतराश्रयत्वेन दुःसंपादत्वादुक्तव्याप्यत्वनिश्चये बाधकाभावइत्यभिप्रेत्याह नेति । रा म०
स्मार्तस्फूर्तिसंभवे प्रत्यक्षस्फूर्तेः पाक्षिकार्थत्वं तस्मिंश्च सति तद्इत्यन्योन्याश्रयमनुपपादयितुं तत्साक्षिकार्थत्वं स्मार्तस्फूर्ति ३२
संभवैकल्प्यं न शब्दस्वारस्यसिद्धमितितावदाह स्वरसतइति । तत्संभवश्च तत्साक्षिकत्वे क कल्प्यो नान्यथेत्याह तस्मिंश्चेति

।फलितमन्योन्याश्रयमाह तत्रेति। तन्मूलंवदन्नधिकरणार्थमुपसंहरति चातइति। मूलाकांक्षाशामकमाह भ्रांतीति।
ननु नमन्वादीनां भ्रांत्यादिसंभव इत्यत आह न हीति। कस्यचित्तुच्छस्य महर्षीणामपि व्यतिक्रमादिदर्शनादिति भावः। ननु
संभावनामात्रेणाभ्रांत्यादिमूलकल्पनेष्टकादिस्मृतिष्वपि तदापत्तिरित्यत आह संभाव्यमान इति। दृष्टेति। स्मृतिविरोधा
विरोधवैदिकपरिग्रहापरिग्रहादीत्यर्थः। स्मृतीति। अष्टकादिस्मृतीत्यर्थः। नसर्वत्रेति। न्यायमूलमर्द्धवैशसमप्यदो
षइतिभावः। सूत्रे। स्मृतिस्मृतिविरोधेमानांतरानपेक्षंश्रुतिवाक्यमेवप्रमाणंस्यान्नस्मृतिवाक्यंयस्मादसत्येवविरो
धेस्मृत्यनुमानं॥ ॥हेतु॥ इदंसूत्रंभाष्यकृताश्रौडुंबरीवेष्टनस्मृतौविस्तृतवस्त्रलोभप्राप्त्याचतारिंशाद्दूषितब्रह्मच
र्येस्मृतौस्वल्पीवत्वाच्छादनस्यक्रीतराजकान्नभोजनस्मृतौबुभुक्षायाश्चहेतोर्दर्शनात्तन्मूलाएवतत्स्मृतयोनवेदमू
लाइत्यन्वाचयहेतुपरतयापूर्वाधिकरणशेषत्वेनव्याख्यायापश्चात्स्मृतिविरोधेनेवप्रधानहेतुनास्मृतिबाधसिद्धेरन्वाचय
हेतावनतिप्रयोजनतयाधिकरणांतरत्वेनापिव्याख्यातंतद्दर्शयति अधिकरणेति। आद्यद्वितीयाधिकरणाभ्याम

३३ गत्वार्थत्वाय क्रमेण विषयं विशिनष्टि त्रत्र यस्मात्तोस्यादि। गृहस्था कारणकं लोमादिकारणकं। वैसर्जने ति। अ ए
33 वांतरदीक्षा विसर्जनार्थो होमो वैसर्जनहोमः स च यजमानतत्पत्नीपुत्रभ्रातृप्रसृतमन्वारब्धेषु हुते न वासत्सोपरिसंप्र
छादितेषु कर्त्तव्यस्तत्र तत्संप्रच्छादनार्थवासो वैसर्जनहोमीयं अत्रादिशब्दे न पूपहस्तिनोदानमाचरंतीत्यादि संग्रहः। पू
पहस्तीपूपपरिव्याणशाटकं। अविरोधादित्यनेनैव पूर्वाधिकरणसिद्धांत हेत्वभावात्संगतिरपि सूचिता। कर्तृसामा
न्यं वैसर्जनहोमीयादिस्मृतावप्यस्ति अतः श्रुत्यविरोधादिति। श्रुत्यविरोधे सति कर्तृसामान्यं प्रमाणपहे तुरिति भावः
नात्संतेति। दृष्टेसंभवत्यदृष्टकल्पनायायाअन्याय्यत्वादिति न्यायादिति भावः। वो भिन्नक्रमो प्यर्थकः श्रुत्यविरुद्धमपीत्य
र्थः। नन्वेवं दानादिस्मृतेरप्यप्रामाण्यं स्यात्तत्राहातोन्यदिति। दानस्मृति मन्वादिप्रणीताष्टकादिस्मृतिसहपठिता। इत्य
नुपपुक्तकतयापयातइतिविशेषइतिभावः॥ ॥एतदधिकरणद्वयं वार्त्तिककृता दूषितं तद्दर्शयति पस्त्विति। यदुक्तं चे एम०
ष्टनप्रत्यभिभावव्याप्यमिति गृहीतस्पर्शनप्रमाणप्रत्यक्षेणप्रतिबंधान्न चेष्टनश्रुत्यनुमानोदयइति। तदयुक्तं स्पर्शनश्रु ३३
त्या।

तेर्वेष्टनप्रमाणांतराभावव्याप्यत्वग्रहसंभवेपिवेष्टनश्रुत्यभावव्याप्यत्वग्रहासंभवात्। सहिक्कापि साश्रुतिर्नोप
ब्धतइतिनिश्चयेस्यात्सएवदुःशकइत्याशयेनाह भवेदिति। यदिस्मृतिमूलंकदाचिदपिनपश्यतइत्यध्यवसातुंशक्य
तेतदैवमुक्तरीत्यास्मृतेर्वाधोऽप्रामाण्यंभवेन्नचैवमध्यवसातुंशक्यमितियोजना। तच्छक्तौवाकथंवाधइत्यपेक्षायां
तदुपपादयतिनदाहीति। सकलेति। सकलजनानांसमस्तानिप्रत्यक्षानुमानादीनिप्रमाणानितत्सत्ताथातिवर्त्तित
दविषयइत्यर्थः अशक्यत्वेहेतुमाहानंतेति। अनंताश्चसंख्याः चरणास्तांप्रदायिकाश्चाधारोयासांतास्तासामनेक
सहस्राणामतिव-- सत्यपिविरोधइति। व्रीहियवादिश्रुतिवत्प्रामाण्यसंभवादितिभावः। अपिनाविरोधाभा
वेवैसर्जनहोमीयादिस्मृतीनांकिमुवक्तव्यमितियोतितं। यदिहिस्मृतिमूलश्रुतिर्निस्यानुमेयोच्येततदाप्रत्यक्षश्रु
तिविरोधेनतदनुमित्यनुदया--भावनिश्चयेस्मृतेरप्रामाण्यंस्यान्नतुतथोच्यतइत्याहनित्येति। अस्मिन्पक्षेनश्रु
त्यभावनिश्चयइत्याहयदा-- इवघ्राह्योवाक्यालंकारेनतुसंभावनामात्रेणकथंतदभावानिश्चयस्तत्राहहेक्षा

३४ हीति। दृष्ट्यादर्शनात्प्रयोगानुपलब्धेः। तदभावे नियतेति। विप्रकृष्टस्मृत्यभावमाप्येत्यर्थः। समस्तेति। सर्वशाखानामुप
34 लम्भेऽसतीति हि तज्ज्ञातवेष्टनस्कृतेः सुपलंभयोग्यतया तदनुपलंभो योग्यानुपलब्धिः स्यान्न तु तथा सर्वशाखोपलंभो
ऽस्तीत्यर्थः। अथ द्वितीयमाशंक्य निषेधति नचेति। विप्रकृष्टतीति। दृष्टप्रमाणस्कृतिविरुद्धस्कृतीरित्यर्थः। नियतत्वा
भावे हेतुं व्यभिचारं दर्शयति विरुद्धानामपीति। आद्यकल्पनिरासमुपसंहरति नेति। द्वितीयमादाय निषेधति नापीति
। तमपि द्वेधा विकल्पयति सइति। द्वितीयं निरस्यति न च सर्वेति — प्रकीर्णस्मृतिवादेष्टसंभावनिश्चयाशंकात्वं व्यतिरे
कमुखेनाप्याह नित्येति। ननु पुरुषान्तरप्रत्यक्षं नरस्य प्रत्यक्षवद्धि स्वं मयापि यमिस्यात इत्याह नान्तइति। स्यान्नेष्टकृतेः संभावना
मात्रमेतन्न निश्चय इत्यत आह यदा चेति। इयं स्मृतिर्वेदमूला मन्वादिप्रणीतत्वादष्टकादिस्मृतिवदिति भावः। विरुद्धार्थ
त्वेऽशक्यानुष्ठानापत्तिरित्याह तत्र चेति। ननु सर्वस्य स्वप्रत्यक्षविरुद्धविषयपरप्रत्यक्षेन सर्वथापि स्वं भोजनस्कल्पवद्वि एम० ३४
कल्पानुष्ठानायोगइत्यत आह यदि परमिति। संभावनायां यदिशब्दः क्रियत इति संभाव्यत इत्यर्थः। व्यवहारः स्वप्रत्यक्ष

स्यर्थानुष्ठानं परत्वसम्पत्स्यर्थो ननु ष्ठानं चानन्वनादरस्वीकारे दृष्टादिष्वपि तत्संगमनत्राहानादराश्चेति। नहस्वतमद्
ति। क्वचिद्देवांशेन तु सर्वत्रेत्यर्थः। तादृशमंशम— दृष्टेति। न दृष्टं मूलं अस्ति यस्मात्स्य इत्यर्थः। अति विरुद्धस्येत्यपि वे
ध्यं। अन्यथा उक्तातिप्रसंगापरिहारात्। ननु —शेऽपि वेदे न स्मृतिवत्प्रामाण्यमस्त्वत आह यायेति। वेदे न स्मृतिर्न्या
या भासमूलेति भावः। तादृशस्मृतिमुदाहरति चंगवेति। पित्र्यपज्ञस्यकालत्वादनंगस्यादित्समावास्याशब्दस्य काल
परत्वेन दृशा कर्मसमभिव्याहाराभावान्नतदंगपिंडपितृयज्ञः। किं तु स्वतंत्र इति तदनंगत्वसाधकचातुर्थिकाधिक
रणापूर्वपक्षप्रत्याभासमूलकमंगंवेसादिकल्पसूत्रवचनं पश्येत्यर्थः। अविशेषादिति। दर्शपूर्णमासयोराग्नेयं चतु
र्द्धा करोतीति विहितं यच्चतुर्द्धाकरणं तद्विषयमिदं कल्पसूत्रवचनमग्निसंबंधाविशेषादाग्नेयाग्नीषोमीयावुभाव
पि चतुर्द्धा कुर्यादित्यर्थकं शेषभक्षगुणसंयुक्तं इति निरपेक्षाग्नि—वना बोधकतद्धितप्रत्ययांताग्नेयशब्दस्याग्नीषो
मीयेऽसंभवादाग्नेयस्यैव चतुर्द्धाकरणमिति तार्तीयाधिकरणसिद्धांतव्याकर्त्स्यपूर्वपक्षप्रत्याभासमूलकमित्यर्थः।

३५ नन्वेवं वेष्टकादिस्मृतिष्वपि न्यायाभासमूलत्वसंभवात् कल्पसूत्रवचनवदप्रामाण्यमेव स्यादित्यत आह नत्विति।
35 कल्पसूत्रे समभिव्याहारादविशेषादिवदष्टकादिस्मृतौ हेत्वाभासानुपन्यासादिति भावः। सूत्रस्य गतिमाह व्यव
हारेति। गौणत्वमिति। अननुष्ठेयार्थकमित्यर्थः। उपसंहरति तेनेति। फलतः अननुष्ठानात्॥ ॥इदानीं बाधितार्थकत्व
प्रमित्यजनकत्वरूपाप्रामाण्यपरत्वेन वर्णितां तदमाह यद्वेति। शाक्यादीत्यादिशब्देन वार्त्तिकोक्तपाशुपतपांचरा
त्रादिसंग्रहः। आभाणीति सिद्धांताभिप्रायेण। पूर्वेति। अपि वा कर्तृसामान्यात्प्रमाणमनुमानं स्यादिति सूत्रस्य
धिकरणसिद्धांतसूत्रोक्तमष्टकादिस्मृतीनामग्निहोत्रादिवैदिकपदार्थैः समानकर्तृकत्वप्रामाण्यकारणमत्र ना
स्तीत्येवं तत्रत्यसूत्रदाहरणरूपेणेत्यर्थः। सत्संप्रयोगे पुरुषस्येत्यादिसूत्रेणापौनरुक्त्यमाशंक्याह तेषामिति। ननु सति
हि वैदिकार्थैः समानकर्तृकत्वे कर्तृणां वेदस्येव धर्मप्रमाणत्वदृष्टानुक्तं धर्मत्वेन न ब्रूयुरिति वेदमूलकत्वसंभा राम. ३५
व्येत इह तु तदभावान्न तत्संभावनेत्याशंक्यापूर्ववेदमूलताभ्युपगमान्न प्रसिद्धवेदार्थसमानकर्तृकतापेक्षे

त्याह तेषां हीति। भिन्नप्रस्थानाः प्रसिद्धवेदार्थासंवलितार्थकाः वेदान्तरसंभावनामाह यथेति। तर्ह्युपलभ्येरन्नित्यत
आह तेचेति। ननु नष्टत्वे वेदानुपलंभः संभावितइत्यत आह मन्वादीति। केचित् नष्टापिकाद्यपः ननु वेदविरुद्धेषि
मिरेव तत्परिग्रहान्न तैर्वेदमूलत्वमाशंकनीयमत उक्तं त्रिशंकरणार्थमधिरतां व्यर्थमित्याशंकाह इत्यंचेति। अपूर्व
वेदमूलत्वप्रकारेणेत्यर्थः। केषांचित् वैदिकानामेव मध्ये केषांचित्। नन्वत्राधिकरणस्यार्थवत्त्वेकः पुनरत्र पू
र्वपक्षस्तत्राह छुत इति। यदेवाधिकरणारंभसमर्थनार्थमुक्तं तेषां हीत्यादि तत्सांदिमविष्यतीत्यंतं तेनैव छुत इत्यर्थः
। यदुक्तं मन्वादिप्रणीतानां केषांचिन्मते एषा एवा मूलत्ववदिह प्रलीनवेदमूलत्वमिति तत्राह अविच्छिन्नेति। तत्र वैदि
कपरिग्रहः कल्पकोनेहेत्यर्थः। प्रत्युतावेदमूलत्वकल्पकमेवास्तीत्याह शाक्यादिष्विति। इदंस्मरणमित्यन्वयः। तस्य विशे
षणमसंतं विपरीतमिति। वेदमूलत्वविरुद्धमित्यर्थः। स्मरणमभिनयति अवैदिकमवेदमूलमप्रमाणं प्रमित्यजन
कं चेति। अवेदमूलत्वकल्पकांतरमाह वेदेति। अत एवाहिंसादिवेदार्थैकदेशसंबंधे न कल्पकांतरेणानन्मूलत्वं

३६ 36

नकल्प्यमित्याहदृष्टेति। वेदद्वेषिपरिगृहीतत्वादित्यर्थः। तत्र त्वहिंसानिषेधस्य यागीयपशाधारणत्वान्न वेदार्थत्वमि
ति भावः। उपसंहरति अत इति। दवीयसी दूरतरा असन्मूलकत्वाद्वेदद्वेषमूलककत्वात्॥ ॥शिष्टा॥ आचांतेन
हृताचमनेन कर्त्तव्यं वैदिकं कर्मेत्यादिः आचारेणाहृत्तेनास्मत्पुक्तपुरुषार्थानां क्रतुमध्येऽनुष्ठानाभावेन विरो
धशंकाभावाभावात्क्रत्वंगेत्युक्तं। क्रत्वंगाविरोधेत्यर्थः। तेन सर्ववेष्टनादिस्मृतिरूपवच्छेदः। किमित्यत्र वि
रोधाविरोधावेव विचार्येते तयोः सतोः प्रामाण्याप्रामाण्ये स्मृत्यधिकरणाविरोधाधिकरणाभ्यामेव सिद्धे
इति तद्विचारः फलविचारतया तथा च विरोध एवाशंक्येनेति विरोधाधिकरणविषयव्याख्यार्थत्वादस्येते
न संगतिर्वोध्या हेतुदर्शनाधिकरणं तु समनंतरमपि विरोधाधिकरणाभ्युच्चयहेतुभूतहेतुदर्शनस्य स्वा
तंत्र्येणाप्रामाण्यावहत्वपरतया विरोधाधिकरणाभक्रमेवेति न तेनास्य पृथक्त्वं गत्यपेक्षा। क्रतुमध्य इ राम॰
ति। अनेन क्रत्वपक्रमकर्त्तव्याचमजं नोदाहरणं श्रौतक्रमाद्यविरोधित्वादिति सूचितं। क्रमादेः पदार्थगु ३६

णत्वात्पदार्थानां ततो विप्रावल्याक्रमादिवाधेन शास्त्रांतरीयपदार्थोपसंहारोस्तीति वक्ष्यमाणाशास्त्रांतरा
धिकरणेनैव गतत्वमिदमित्यस्वरसादाह अथवेति। अस्मिन्पक्षे प्रमाणादिविचारोऽधिकरणांगमेवातस्त्र
सत्यपि विशेषे प्रामाण्यमुत्पादनाद्विशेषाधिकरणेनापवादिकी संगतिः। प्रमाणेति।। प्रमाणयोः श्रुति
स्मृत्योर्यद्बलाबलं क्रमेण प्रबलदुर्बलभावः यच्च प्रमेययोः स्मृत्यर्थश्रुत्यर्थयोः पदार्थतद्धर्मरूपयोर्बला
बलं तयोर्विसंवादे विरुद्धानुष्ठानप्रसंजकत्वे सतीति किं न्यायः उपसंजितानुष्ठापकमित्यर्थः। तत्र तदर्थसंश
यस्य मूलसंशयोपपादकत्वं दर्शयन् प्रमाणबलाबलं तावद् दर्शयति तथाहीति। अवस्थितं स्मृत्यधिकरण
इत्यादिः। तत्र संजितं दर्शयस्तत इति। बलीयांसः अनुष्ठेयाः तथा च स्मृतेः प्रामाण्यं सिद्ध्यतीत्यर्थः। प्रमेयब
लाबलं दर्शयति प्रमेयेति। पदार्थाः प्रधानभूता इति शेषः। तथा च प्रधानोपसर्जनभावरूपं प्रमेयबलाबलं द
र्शितं तत्र संजितं दर्शयति बलीयांस इति। ततश्च स्मृतेः प्रामाण्यं सिद्ध्यतीत्यर्थः। उक्तबलाबलद्वयविशेषमिवं

धानं संशयमाह इति चलाचलेति। आद्यं पूर्वपक्षं संगृह्णाति सार्द्धश्लोकेनाक्रतीति। व्याकोपो बाधः। अतः व्या
कोपात्। विरोधफलमाह तत्रेति। विरोधे सतीत्यर्थः। द्वितीयं संगृह्णाति पूर्वेति सार्द्धश्लोकेन। पूर्वमाविप्रथ
माचरणं यत्समाराणं तत्स्थं ज्ञातकरणं स्यामित्यर्थः तेन प्रमाणाचलाचलेन। निर्णीत इति। क्रमाद्यनुष्ठेयत्वे इत्या
दिः इतरेति। इतरस्मिन्नप्रमेय चलाचले आदरात्तत्संजिते आचमनादावनुष्ठेयताबुद्धिः। अनादरे हेतुमाह नैराका
ङ्क्ष्यादिति। फलितमाह अत इति। स्मृतेरप्रामाण्यं सिद्ध्यतीत्यर्थः। आद्यपूर्वपक्षोक्तविरोधहेतुं स्मार्तैः श्रौतबाधप्रसं
गं वक्तुं श्रौतक्रमादीन् दर्शयति वेदमित्यादिना। वेदो दर्भमुष्टिः। इतीति। एवंप्रकारेणाक्रतसर्थपाठादि गम्य इत्यर्थः। का
लत्रिप्रकारत्वत्रद्विप्रकारं दर्शयति यदिति। अविप्रकर्षः संनिहितत्वं प्राशुभावः शैघ्र्यं। अवगत इत्यविप्रकर्षणापि वि
शेषणं सर्वांगसहितप्रधानानुष्ठापकेन प्रयोगविधिना एकस्मिन्नसर्गे तत्साहित्यासंभवात्तन्निर्वाहार्थमाक्षिप्तमाविप्र
कर्षप्राशुभावावित्यर्थः। तृतीयप्रकारं कालमाह यस्येति। पूर्वोक्तो वैदेवाना मित्यादिक्रतिविहित इति शेषः। सिद्धार्थमि

ति। परिमाणप्रयोजनोक्तिः। अपेक्षितमिति। तथा च तेनाक्षिप्यत इत्यर्थः। प्रचयादिति तत्प्रमाणोक्तिः। तदेतदि
ति। तत्र वेदवेद्यनुष्ठानमध्ये स्कन्नादिनिमित्ता च मनाद्यनुष्ठाने वेदं कृत्वेति स्कान्दस्कन्नेरं तदर्थरूपः क्रमः प्रधानसंनि
कर्षरूपः प्राशुभावरूपश्च कालो विरुध्यते पदार्थभूयस्त्वे पूर्वावृत्त्यादिः पदार्थपरिमाणं च विरुध्यते एवं तन्मध्य एव देवा
द्यज्ञोपवीतस्रंसने यथापूर्वस्थापने क्रमकालो विरुध्येते दक्षिणहस्तेनैव करणे प्राशुभावो विरुध्यत इति यथासं
भवं बोध्यं। अन्यथात्वं बाधं प्रतिपद्यते शास्त्रं प्रसज्यते। तत्फलमाह तेनेति। तस्यापि फलमाह विरोधे चेति। स्मृतेरप्रामाण्य
फलतीत्यर्थः। इदानीं द्वितीयपूर्वपक्षं तदीयसिद्धान्तं निरसनपूर्वकं विवृणोति न चेति। बलीयस्त्वमिति। तथा च प्रमेयबला
बलाश्रयणेन स्मृतेः प्रामाण्यं युक्तमित्यर्थः। प्रथमोपस्थितप्रमाणबलाबलादेवानुष्ठेयनिर्णये पश्चादवगतं प्रमेयबला
बलमकिंचित्करमित्याह प्रमाणेति। प्रकृत इत्यादिः। प्रकृते प्रमेयावगमः। श्रुतिस्मृत्योः शब्दयोर्ज्ञापनानयोरेव बोधक
त्वाद्ज्ञाप्यमानप्रमाणजन्य इत्यर्थः। ततः किं तदाह तेनेति। पूर्वभावीति। प्रथमावगम्य इत्यर्थः। फलितमाह तेनेति। निराकां

३८ क्षत्वात् अनुष्ठेयजिज्ञासाशांतेः आदर्शे यं अनुष्ठाननियामकत्वेन ग्राह्यं। द्वितीयपूर्वपक्षमुपसंहरति। तस्मादिति। आ
द्यसिद्धांतं संगृह्णाति पदार्थेति। सर्वपदार्थप्राप्त्युत्तरमेव तरतः क्रमादेस्तदनुगुणत्वेनैव कल्पनान्न विरोधः। स्मार्त
38 पदार्थभूयस्त्वे पूर्वं गृह्णादिकालविरोधस्तस्य न भिन्नहोमादिश्रौतनैमित्तिकपदार्थभूयस्त्वे एवं कथंचित्साससा
परिहर्तव्य इति भावः। द्वितीयं संगृह्णाति विरोधेपीति। गुणत्वतः धर्मत्वात्। ननु वेदं कृत्वा वेदिमित्येवं क्रत्वादिगम्यः क्र
मः श्रौतावेवहावेव पदार्थावपेक्षते न सर्वान् नादिस्मार्तपदार्थान् तत्कथमनपेक्षितप्राप्तिकेस्तेः क्रमाद्यविरोध इत्यत
स्तदपेक्षामुपपादयन्पूर्वोक्तं विवृणोति सर्वेष्विति। प्रयोगेति। प्रयोगविधीत्यर्थः। तद्विशेषणतया प्रयोगांगतया
आयततिज्ञानो भवति। ततः किं तदाह तेनेति। पदार्थप्राप्त्यनंतरप्रवृत्तप्रयोगविधिविशेषणत्वेन पदार्थप्राप्त्यपे राम०
क्षाऽवसीयत इति शेषः। अयं भावः क्रत्वादिगम्यः क्रमो हि न प्राप्तिस्वरूपपदार्थविधिभिरपेक्षितस्तस्य प्रसक्तेकावृत्ति ३८
त्वात्किंतु प्रयोगविधिनानुष्ठापकेन अनुष्ठानं च क्रतिस्मृत्युपनीतसर्वपदार्थानामिप्राप्ति क्रमस्य स्मार्तपदार्थापे

क्षापीति चेत्तत्रापेक्षा नावगता कथमविरोध इत्यत आह पदार्थप्राप्तीति। उक्तापेक्षावशात्पदार्थानां क्रमस्य च पूर्वापरीभा
वेऽस्तीति पूर्वभाव्यनुग्रहात्तया पश्चाद्भाविकल्पनादविरोध इत्यर्थः। प्रयोगविधेः क्रमस्य वाक्योत्थैवापेक्षा युक्ता न तु ज
घन्यस्य तु लैङ्गिकीति शङ्कां वारयितुं जघन्यस्य प्रमाणाकोपीत्युक्तं। जघन्योऽप्युपजीव्यत्वाल्लिङ्गादिगम्यवदपेक्ष्यत इति भावः।
कालस्यापि पदार्थैरविरोधमाह कालेति। एवं चाविरुद्धः अविरोधमुपपादयति प्रयोगेति पूर्वोक्तत्वादिः संनिकर्षः प्राशु
भावश्चेति त्रिविधोपि कालः सर्वेषां पदार्थानां भवतीत्यत्र हेतुः प्रयोगाङ्गत्वादिति। कालस्याप्याकांक्षावलात्प्रयोगविधिशे
षत्वात्प्रयोगविधेश्च सर्वपदार्थप्राप्त्युत्तरं प्रवृत्तेः कालस्यापि सर्वपदार्थप्राप्त्यपेक्षत्वात्पूर्ववदविरोध इत्यर्थः। परिमाणं त
श्रौतत्वेनाप्राप्तत्वात्तस्मान्न विरोधीत्याह परिमाणं त्विति। कस्यचित्प्रत्यर्थपाठाद्यन्यतमस्य। नन्वविस्मृतस्य वोऽनुष्ठान
सिद्धये प्रयोगविधिनापेक्षितत्वात्तदापेक्षितं परिमाणं प्रयोगविधिरूपशास्त्रार्थ एव प्रत्ययावगतत्वाद्वा प्रत्ययरूपशा
स्त्रार्थ इत्याशङ्क्याह प्रयोगेति। अन्यथेति। नहि येनापेक्षितं तत्तदेव तत्र प्रमाणं किं त्वन्यदेव वाच्यं तच्चात्रत्याधर्यायवधा

३९ 39 नेनान्यथासिद्धमत एव प्रचयोपि न तत्प्रामाण्यमिति भावः। उभयमप्युपेत्याप्याह अथापीति। एवं सत्यपीत्यर्थः। प्रा
प्त्यर्थः इति चेदिति शेषः। विरोधमङ्गीकृत्योत्तरान्तं विवृणोति न द्वितीयं सिद्धान्तमाह यद्यपीति। पूर्वपक्षमुक्तमनूद्य निषेध
ति न चेति। पूर्वभावित्वं प्रथमावगतत्वं नेत्यत्र हेतुं वक्तुं वक्तृगतिमाह नहीति। अतिप्रसङ्गादिति भावः। तदेवोपपादयति
प्रमेयगतं हीति। तत्र किं तदाह तद्यदेति। बलाबलमिति। अवगम्यत इत्यनुषङ्गः। तथा च प्रमाणस्वरूपयोः पूर्वावगतत्वेपि
न तद्बलाबलस्य तदिति भावः। फलितमाह इतीतत एवेति। ननु स्मृतेः श्रुत्यविरोधे इव तद्विरोधेपि प्रामाण्ये ऽतिप्रसङ्ग इ
त्याशंकाव्यवस्थामाह यद्वीति। अवैदिकशाक्यादिस्मृतिलक्षणमित्यर्थः। पतितेति। वैदिकप्रणीतमित्यर्थः। अप्रमा
णं यथा अङ्गं वा समभिव्याहारादिसाध्यं शाइत्यर्थः। प्रमाणं यथा ऽष्टकादिस्मृत्यंश इत्यर्थः। ननु तर्हि प्रवृत्ते प्रथमाव प्राम०
गतप्रमेयबलाबलेन प्रथममनुष्ठेयनिर्णयेपि पश्चादवगतप्रमाणबलाबलेन तद्बाधः किं न स्यादपच्छेदाधिकरणा ३९
न्यायात्तथा च स्मृतेः प्रामाण्यमित्याशंक्याह न चात्रेति। अबाधकत्वादिति। तत्र पूर्वापच्छेदनिमित्तकाद्दक्षिणाप्रयोग

सापराधच्छेदाद्विहितप्रयोगान्तरेणावकाशत्ववद्विह प्रमेयबलाबलनिर्णीताचमनादिकर्त्तव्यताया अन्यत्रावकाशा
भावाद्दौर्बल्यमिति भावः। तर्हि विरुद्धानां पदार्थेत्तक्रमादीनां कथं निवेशस्तत्राह तस्मादिति। तदनुरोधे नैवेति। न तु
तदननुष्ठानतात्पर्येणावोध्यं तदित्यर्थः। उपसंहरति इत्याचमनेति। तत्त्वेक्षणादिति एकक्रमादेशकोपे वाधेऽसतितद्वि
रुद्धमाचमनादिस्मृतिवचनमप्रमाणमिति चेत्॥ ॥एवं यथाभाष्यमुक्त्वा आचार्यव्याख्यानं वक्तुमाह नत्विति। अ
तिमंदत्वादिति। शुचिना कर्म कर्त्तव्यमिति श्रुत्यादिनिमित्ताशुचित्वनिरासेनाचमनादेर्वैदिकपदार्थाङ्गत्वात्तस्यांगं स्वव्य
वधायकमित्यविरोधादाद्यपूर्वपक्षस्य मंदत्वं। विरोधाधिकरणभंगोक्तरीत्याचमनादेरपि प्रत्यक्षश्रुतिमूलत्वेन प्र
माणबलाबलविभागाभावाद्द्वितीयस्य मंदत्वं। पक्षस्येति। यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वा यज्ञस्य प्रसृत्या इत्य
स्मदादिप्रत्यर्थः। दक्षिणाचारस्तु यथा वै दक्षिणः पाणिरेवं सदेवयजनमिति प्रत्यक्षश्रुतिः तत्तत्स्नायज्ञांगत्वो
न्नयनात्प्रत्यक्षश्रुतिविहितत्वं। आचमनस्यापि न सोमेनोच्छिष्टा भवंतीति सोमभक्षणेऽनुच्छिष्टलक्षणाउच्छिष्टनि

४०

भिन्नाचमनामावबोधनाद्बुद्धिभेदांतरेष्वाचमनोन्नयनान्नथात्वं बोध्यं। कानर्हि सूत्रगतिस्तत्राह तस्मादिति। पूर्वं
विरोधाधिकरणभाष्यमंगानंतरं उक्तं वार्त्तिककृदिति शेषः। चोद्यं चोत्तरं च तयोर्भावस्तत्त्वं तेनेत्यर्थः। तत्राद्यं सूत्रं
चोद्यपरत्वेन व्याचष्टे यत्त्विति। न कोपपत्तीति। एतेन शिष्टानामकोपे अविरुद्धमिति सूत्रे पदच्छेदो दर्शितः। द्विती
यमुत्तरत्वेनावतारयति तत्रेति। शाक्याद्यहिंसावचनं धर्मे न प्रमाणमेतावं स्येवेति धर्मप्रमाणशास्त्राणां प
रिमितत्वादिति सूत्रार्थः। सूत्रं व्याचष्टे नत्वल्पेति। नन्वर्थं स्वाध्यमुक्त्वाहेतुं व्याचष्टे स्वाध्याय इतीत्यादिना। इत्यादि
भिर्नियतत्वादित्यन्वयः। नियम्यमाह वेदादिभिरिति। इत्यादिभिरित्यत्रेतिशब्दोपात्तनियमप्रकृतिस्मृत्यादौ श्रुतिं द
र्शयति स्वाध्याय इति। अध्ययनेनैवार्थमवबुध्यानुतिष्ठतां फलं भवतीत्यध्ययननियमविध्यर्थान्नद्विधेर्निया
मकत्वमित्यर्थः॥ स्मृतिवेद इति। मूलं प्रमाणं। तद्विदां वेदविदां मन्वादीनां स्मृतिर्निबंधनं शीलमाचारः। स्ता चत
ह्यते। स्मसंतरमाह धर्मज्ञेति। समयः संकेतः आचार इत्येतत्। वेदाश्च प्रमाणं धर्म इति शेषः। पौराणिकं वचनमाह पु

रा म॰
४०

राशेति। न्यायो गौतमशास्त्रं धर्मशास्त्रं मानवादि अंगानि शिक्षादीनि षट्। वेदाश्चेति चतुर्दश धर्मस्य विद्यानां ज्ञा
नां नास्थः नानिकारणानीति योजना। ननु श्यावकर्णादिनोप्यहिंसादिधर्मप्रमितिः शक्यत इत्यत आह। मन्त इति। यद्यपि वेदे
नैव प्रमितमहिंसनं प्रत्यवायपरिहारायेति नियमासंभवादन्यप्रमितमपि तत्तदर्थं भवति तथाप्यतद्गुणासंविज्ञा
नबहुव्रीहिणा तदुक्ततटाकारामादिष्वहिंसापदार्थस्तथा च तद्भूथादवगत्यतटाकादिनिर्माणं निष्फलमित्यत्रता
त्पर्यं। न चैवमहिंसांशे तत्प्रामाण्यापत्तिर्योगीयहिंसासाधारण्येन तत्प्रतिषेधादिति बोध्यं॥ ॥अष्टकादिकं व्याव
र्णयति अनिबंधा इति। मन्वादिस्मृत्यनिबद्धा इत्यर्थः। सदिति। फाल्गुनकृष्णप्रतिपदि परस्परं जलसेको वसंतोत्सवः का
र्त्तिकशुक्लप्रतिपदि दीपदानादि रादिपदार्थः। शाकादिस्मृति वदाचारस्याप्यप्रामाण्यमित्युपस्थितेः संगतिः। पुनरुक्ति
शंकां परिहरति तत्रेति। निर्निबंधनतया अनिबद्धतया अतिक्रमो विश्वामित्रादेश्चंडालयाजनादिः। सहसं वसिष्ठस्य
पुत्रशोकादाभृगुपतनादिरूपस्तम्बधादोपरतिः॥ आक्षिप्ये — — ढ्वांतोत्सवादयो न प्रमाणाम्यवेदमूलकत्वाच्छाका

४१ याचारवत्। नचासिद्धिः विमतास्त्ववेदमूला अनिबद्धात्वात् कलंजभक्षणादिवत् नच विमतीः प्रमाणानि वेदमूला
41 वा शिष्टाचारत्वादिति वाच्यं विमता नोभयविधाः धर्मव्यतिक्रमादिसमानकर्तृकत्वात् त्रिशंकुयाजनादिवदिति सत्प्रति
पक्षादाक्षिप्येत्यर्थः। तत्रावेदमूलकत्वं विपक्षबाधकतर्केण द्रढयति यदिहीति। मूलं वेदरूपं। नन्वनिबद्धत्वमसिद्धं आ
चारश्चैव साधूनामात्मनस्तुष्टिरेव चेति निबद्धत्वादित्याशंक्य न यथा कथंचिदनिबद्धत्वं हेतुः तत्स्वतियोगिनो वेदमू
लत्वाप्रयोजकत्वेन तस्यावेदमूलत्वहेतुत्वे नानुपम्यसनीयत्वात् किं तु प्रातिस्विकरूपेण निबद्धत्वं हेतुः स चेहास्तीत्यभि
प्रेत्याचारश्चैव साधूनामित्यस्य सामान्यतो निबंधनत्वान्न वेदमूलत्वे प्रयोजकत्वं किं त्वनास्थाग्रस्ततया आपातिकानुमा
नमूलत्वमिति प्रतिपादयति अथवा मूलवेदादर्शने मन्वादयः कथं सदाचाराणां प्रमाणं ब्रूयुस्तत्राह आचारेति। इत्ये
वं प्रामाण्यमनुमीयत इति मन्यामहे तर्कयामः। अनुमीयमानत्वे हेतुः परोक्षेति। आचारत्वसामान्यरूपेणेत्यर्थः। एतदु राम
क्तं भवति। मन्वादिभिस्तदानींतनानामाचारं दृष्ट्वा एते सदाचारत्वात् प्रमाणानीत्यनुमाय आचारश्चैवेत्यादि निबद्धं ननु तन्मू ४१

त्वंवेदंदृष्ट्वाअन्यथासामान्यरूपेणननिबध्नीयुःकिंतुस्वपरिकरमष्टकादिवत्प्रातिस्विकरूपेणनिबध्नीयुरेवंतदानींतना
श्चान्येषामाचारंदृष्ट्वातेप्यन्येषामिति।ननुतथाप्यनुमानमूलत्वेनापिप्रामाण्यमायातमित्याशंक्याहतत्रेति।सेवनि
सानुमेयमस्त्वितिवादाद्यादिति।ननुवैदिकानुष्ठितत्वसिद्धेनधर्मत्वेनप्रामाण्यमनुमेयमित्याशंक्यासिद्ध्याद्दूषयतिधर्मेति
।वैदिकानुष्ठितत्वंव्यतिक्रमादावनैकांतिकमितिभावः।धर्मबुद्ध्यावैदिकानुष्ठितत्वंहेतुस्तत्सिद्धेनधर्मत्वेनाष्टकादीना
मिववेदमूलत्वंतेनचप्रामाण्यंसुसाधमितिसिद्धांतंतावदाहसिद्धांतस्त्विति।तत्रोक्तहेतोर्वेदमूलत्वसाध्यव्याप्तिशैथिल्यं
व्युदस्यतितर्केणाधर्मेति।उक्तव्यभिचारंहेतोःपरिहरतिव्यतिक्रमेति।रागेति।ननुतस्यधर्मबुद्धिनिबंधनत्वरूपविशेषणा
भावइतिभावः।अतएवविशिष्टहेतोर्नव्यभिचारइत्याहधर्मबुद्धीति।चारित्र्यस्यानुष्ठानस्यधर्मलिंगत्वाव्यभिचारइत्यने
नसंबंधः।धर्मलिंगत्वस्यधर्मत्वानुमापकत्वस्याव्यभिचारोनपायः।विशेषणासिद्धिंपरिहरत्यागत्यमाणेति।रागादिकार
णांतरादर्शनेनधर्मबुद्ध्येकनिबंधनत्वादित्यर्थः।अनेनसोत्रंकारणाग्रहणाइत्येतद्व्याख्यातं।बाधंव्युदस्यतिश्रुतीति।धर्म

४२. त्वाभावबोधकस्मृतिस्तत्त्वदर्शनादित्यर्थः। अनेन तेषां दर्शनाद्धिरोधस्येति सूत्रांशो व्याख्यातः। एतेन यदुक्तं शिष्टाचा
रत्वेन वेदप्रामाण्ये वेदमूलत्वे वेदप्रामाण्ये वा साध्ये व्यतिक्रमसमानकर्तृकत्वेन सत्प्रतिपक्षत्वं तन्निरस्तं। तत्र धर्मव्यु
द्यनिबंधनत्वस्योपाधेः सूचितत्वात् दृष्टकादौ व्यभिचाराच्चाप्यनुप्रातिस्विकरूपेण निबद्धत्वाद्वेदमूलत्वमिति तत्र हेतो
रन्यथासिद्धत्वादप्रयोजकतामाह मन्वादिभिस्त्विति। लाघविके लाघवानुसारिभिः दोषो धपरं परापन्निरवेदमूलत्वं
वा। फलितमाह तस्मादिति। वेदमूलत्वादित्यर्थः॥ ॥तेषां॥ पूर्वाधिकरणार्थोऽतिकरीत्या संगतिमाह आचारेति। भाष्यरी
त्या प्रमाणाबलाबलप्रसंगात्संगतिर्बोध्या। ननु भाष्योदाहरणादूषणमयुक्तमार्यम्लेच्छविप्रतिपत्त्योदाहरणापर
त्वेपि भाष्योपपन्नेस्तत्राहात्र भाष्य इति। तथाचार्यम्लेच्छविप्रतिपन्नपरत्वे आर्यप्रसिद्धेः स्वरूपप्राबल्येनैव सिद्धांतः
स्यात्तद्वाक्यशेषानुधावनेनेति भावः। पूर्वप्रकृतत्वादिति। यद्यपि भाष्ये आचाराधिकरणं नास्ति तथापि स्मृत्यधिकरणा राम०
दौ स्मृतितुल्यतया आचारस्यापि प्रकृतत्वादिति भावः। यत्र यवमयश्चरुर्भवति वाराही उपानहावुपमुंचतीत्यादौ विरुद्धा ४२

प्रतिपत्तिः केषांचिद्वाक्यशेषस्य यत्रान्या ओषधयोम्लायंतेथैते मोदमाना इवोत्तिष्ठंतीत्यस्य वराहं गावोनुधावंतीत्यस्य चानु
ग्रहणाय यवशब्दस्य दीर्घशूके प्रतिपत्तिः अन्यौषधिम्लानिकालो हि वसंतस्तत्र दीर्घशूकानामेव मोदमानत्वात्। एवं वराहं
गावोनुधावंतीति वाक्यशेषस्यानुग्रहणाय सूकरे प्रतिपत्तिः गावो हि वराहं चतुष्पात्त्वेनानुकुर्वंति वत्सबुद्ध्या वानुधावंतीति
। केषांचित्तदनुग्रहणाय यवशब्दस्य प्रियंगुषु प्रतिपत्तिस्ते ह्याषाढकालीनानां वसंते स्वरूपगंधस्याप्यभावात्। एवं वराह
शब्दस्य वायसे प्रतिपत्तिर्गवां वायसानुकरणासंभवात्। नन्वेति। यवादिशब्दविषय इत्यर्थः विप्रतिपत्त्योरिति शेषः
। ननु यवादिशब्दा उदाहृता इत्याशंक्याह प्रवादीति। ननु न्यायमाने तात्पर्यादन्यदुदाहरणमस्त्वत आह अन्यस्यापीति। सर्वत्रा
दर्शनं तु निश्चयं तत्राह संदिग्धेष्विति। ननु तत्राक्ताः शर्करा इत्यत्रांजनसाधनं किमिति संशये तेजो वै घृतमित्यनुष्ठेयध
र्मनिर्णय इह तु शब्दार्थनिर्णयस्तत्र गतार्थता तत्राह गतप्रायत्वादिति। निर्णयभेदेपि न्यायसाम्यान्नयेति भावः। बाधक
मप्याह वाक्यशेषाच्चेदिति। प्रसंगादिति। द्वयोरप्यपेक्षसिद्धत्वादिति भावः। तुल्यबलत्वेन पूर्वपक्षमाह लोक इति। शास्त्रार्थ

४२ स्यतो कप्रमाणाग्रमत्वादित्यन्वयः ॥ लौकिकव्यवहारागमत्वादित्यर्थः । शास्त्रार्थस्य पदवाक्यस्य उभयोरार्यम्लेच्छयोः क
न्तर्याप्यत्वहतो विशेषस्तत्राह शास्त्रार्थेति । शास्त्रीयवाक्यार्थभूतधर्मादौ । तमेव विशेषं दर्शयन् श्लोकस्य चतुर्थपादं व्या
चष्टे य इति । धर्म इति । अधर्मस्याप्युपलक्षणं । शास्त्रे अभियोगः वाक्यार्थप्रमित्यनुकूलशास्त्राभ्यासेनैपुण्यं तच्च म्लेच्छेष्व इत्यर्थः
। पदार्थनिर्णये आर्याणां म्लेच्छा विशेषं दर्शयन् आद्यपादत्रयं व्याचष्टे व्यवहारेति । सर्वेति । व्यवहारश्चेत्यर्थः ॥ प्रमाणेति ॥
व्यवहाररूपपदार्थनिर्णायकाविशेषादित्यर्थः । द्वयोरिति । आर्यम्लेच्छसामान्याभिप्रायं नन्वार्यप्रसिद्धेरितः कालादार
भ्येपमित्यवधेरस्यार्यमाणत्वेनानादित्वात्तेषां वा विप्लुतपदार्थनिर्णय इत्याशंक्याह यत्रेति । अन्येष्विति । आर्यव्यवहा
रेष्वित्यर्थः । एवं म्लेच्छेष्विति । म्लेच्छव्यवहारेष्वित्यर्थः । धर्मादिविप्लुतिसिद्ध्यर्थं शास्त्रार्थ इव पदार्थेऽप्यभियोगस्यापेक्षणा
दन्यथा तद्व्यतिरेकशास्त्रवाक्यार्थविप्लुत्या धर्मादिविप्लुतिप्रसंगादार्याणामेव च पदार्थतत्त्वेऽभियोगान्न तस्या सिद्धेर्वत तन्नि
र्णय इत्यभिप्रेत्य सिद्धान्तं श्लोकेन संगृह्णाति । प्रतिपादकेति । व्यवहारोपयिकपदार्थज्ञानमात्रजनकतेत्यर्थः । न्या एम· ४२

न चापदेन पदार्थाविप्लुतिर्व्यवच्छिद्यते अपि त्वभियोगगाढत्वस्य द्योतकः। कुतर्हि तन्नत्वावधारणं तत्राह अविप्लुत इति।
अभ्रान्त इत्यर्थः। शिष्टेषु शिष्टव्यवहारेषु। न तु म्लेच्छव्यवहारो बोधकत्वान्यथानुपपत्त्यैव शक्तिमाक्षिपतीत्याशंक्य तदा-
क्षिप्तशक्तिस्वीकारे नानार्थत्वप्रसंगो बाधक इत्याशयेनाह न तावदिति। तावच्छब्दः क्रमार्थः। अनादित्वसाम्यमप्य-
नुपदमेव निरसिष्यत इत्यर्थः। अदृष्टेति। प्रमाणेनावगत इत्यर्थः। नानार्थत्वमिष्टमित्यत आह दृप्रयोगेति। प्रकरणा-
दिनाप्यनेनावधारणं तदभावे त्वैच्छिकग्रहणमस्त्वित्याशंक्याह कदाचिदिति। पीलुपदप्रयोगे हस्तिग्रहणे वृक्षार्थत्वग्रा-
हकप्रमाणस्याप्रामप्रामाण्यप्रसंगोऽप्रामप्रामाण्यस्वीकारश्चेति द्वौ दोषौ पुनः प्रयोगे वृक्षग्रहणे तस्यैव प्रमाणस्यान्य-
क्तप्रामाण्यस्वीकारः स्वीकृताप्रामाण्यत्यागश्चेति द्वाविति चत्वारो दोषाः। तथा हस्त्यर्थताग्राहकप्रमाणस्याप्रामप्रामाण्य-
त्यागोऽप्रामप्रामाण्यस्वीकारश्चेति द्वौ दोषौ पुनः प्रयोगे हस्तिग्रहणेऽस्यैव प्रमाणस्य स्वीकृताप्रामाण्यत्यागः स्वक्त-
प्रामाण्यस्वीकारश्चेति पर्यायत्रयेण प्रमाणद्वयेऽष्टौ दोषाः स्युरित्यर्थः। कानत्यापि नानार्थप्रयोगयोगेत्यत्राह एक

अभिमानेनेति भ्रमेत्यर्थः २

४४ तेनेति। कथं तर्हि हस्तिन्यपि तस्य मुख्यत्वाभिमानस्तत्राह गौणोपीति। पार्श्वस्थानामिति। अज्ञाततगौणत्वानामि
तिशेषः। अन्येष्वः अज्ञाततगौणत्वेष्वप्येवं एवं चावध्यस्यरणोपि म्लेच्छव्यवहारस्य युक्तितः सादित्वमेवेतिभा
वः। ननु सैंधवादिवत्नानार्थत्वमेव किं न स्यात्तत्राह तत्रेति। विशेषमु [redacted] पपा
दयतिप्राप्नुयादिति। धर्मेति। धर्मस्य विप्लुतिरप्राप्तिः। अधर्मस्य विप्लुतिः प्राप्तिस्तदभावोऽविप्लुतिस्तन्नाम्लेच्छपे
त्यर्थः। एकद्व्यसाधादृष्टस्यद्रव्यांतरेणानुत्पत्तेः प्रकृतार्थविप्लवे धर्मविप्लवापत्तिर्वाचकशब्दप्रयोगादपशब्द
प्रयोगनिमित्तप्रायश्चित्तापत्तिरिति मीमांसाशिष्टाः पदार्थतत्वं परिपालयंतीत्यर्थः। म्लेच्छेष्वनेवमित्याह म्लेच्छास्त्वि
ति। यथाकथंचित्। अपशब्देरपि। प्रयोजनेनेति। धर्माविप्लुतिलक्षणेनेत्यादिः। अविप्लुतिसिद्धाविति। पदार्थतत्वेत्यादिः।
अत एव पदार्थप्रसाधकत्वादार्यव्यवहारवदनार्यव्यवहारोपि पदार्थतत्वनिर्णायकः स्यादनुमीयत इत्यपि नाशंक राम
नीयमित्यभिप्रेत्याह तेनेति। यत्नाभावेनेत्यर्थः। तथा चाविप्लुतियत्नवत्कर्तृकत्वमनुमानउपाधिरिति भावः। प्र ४४

लितमाह इत्यार्येति। उपसंहरति इतिपील्विति। ननु तर्हि किं भाष्यमुपेक्षणीयं नेत्याह भाष्यमपीति। विभागो विम
ति। भाष्ये हि कः पुनरत्र निर्णयः। पः शास्त्रस्थानां सशास्त्रार्थः के शास्त्रस्थाः शिष्टाः इत्यादिना आर्यप्रसिद्धिप्राबल्येन सि
द्धांतकथनादार्यम्लेच्छव्यवहारविमतिपरत्वमवसीयत इति भावः। ननूक्तप्राबल्येन सिद्धांतकथने वाक्यशेषोप
न्यासोऽनुपयोगादप्रयुक्त इत्यत आह वाक्येति। प्रयोजनं पूर्वपक्षे पील्वादि[redacted]शब्दानां हस्त्यादौ शक्तत्वात्प्रयो
गोपि नापशब्दत्वप्रयुक्तं प्रायश्चित्तं सिद्धांते तु नेत्। एवं पैलवौदुंबरौ यूपस्य दंडाविति गौतमस्मृतौ हस्त्यिदंडे न स वै
हपीलुवृक्षदंडस्य विकल्पः पूर्वपक्षे सिद्धांते तु पीलुवृक्षदंड एवेति॥ ॥इदानीमाचार्योक्तं वर्णांतरं दर्शयन्स्मृत्याचा
रविरोधे वाक्यस्यैव प्रामाण्यं न्याये। समाविप्रतिपत्तिः स्यान्मूलसाम्यादुभयोरपीति वार्त्तिकप्रथमपादसूत्रस्थानीयत्वेन
लिखति स्मृतीति। यत्रेत्यस्यादिविवसनेन सामानाधिकरण्येनान्वयः। आदिपदेन पर्युषितभोजनादिग्रहः। विरोधर
ति। मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च। समानप्रवरां चैव समूढ्वा चांद्रायणं चरेदित्यादिनिषेधादिति भावः।

४५ ल्येति। स्मृत्याचारप्रामाण्यमित्यादिः। ननु न स्मृत्याचारयोः समबलत्वं युक्तं स्मृतेः साक्षाच्छ्रुत्यनुमानेन प्रामाण्यम् आचार
स्य तु वक्ष्यमाणरीत्या स्मृत्यनुमानद्वारा श्रुत्यनुमानेनेति वैषम्यात् तत्रापि वैषम्ये समबलत्वे श्रुतिस्मृत्योरपि तस–ब
लत्वं दापत्तादित्याशंकां परिहरन् पूर्वपक्षं श्लोकेन संगृह्णाति बलेति। श्रुतिस्मृत्योर्बलाबलविशेषवदित्यन्वयः। कस्ये
ति। कस्यचिच्छ्रुत्यनुमानरूपव्यवधानेनान्तरितं भावप्रधानो निर्देशो व्यवहितत्वं तेन कारितः। इह स्मृत्याचारयोः एवं न
श्रुतिस्मृत्योर्बलाबलविशेषो नास्तीत्यर्थः। तत्र हेतुद्वयोरिति। श्रुतिमूलतः श्रुतिरूपमूलात् श्रुतिमूलकत्वादिति या
वत्। तथा चाचारस्य स्मृत्यनुमानद्वारा श्रुत्यनुमानरूपव्यवधानेऽप्यमानाभावात् स्मृतिवदेव साक्षाच्छ्रुत्यनुमापकत्वात् स्मृ
त्या समबलत्वं। न च श्रुतिस्मृत्योः समबलत्वापत्तिः श्रुतेः स्वतः प्रामाण्यं स्मृतेस्तु श्रुत्यनुमानेनेति वैषम्यादिति भावः
। श्लोकार्थं विशदयति श्रुत्या हीति। प्रतीपते प्रमीयते। एकेति। स्मृतेरित्यादिः। एकेन श्रुत्यनुमानेनान्तरितात्प्रामाण्याद्धे एम.
तोरित्यर्थः। बलीयसी स्मृतिरित्यादिः। तत्र श्रुतिस्मृत्योर्मध्ये स्मृतेः प्रामाण्यं परतन्त्रं युक्तमित्यन्वयः। विरोधाधिकरणोक्त ४५

ति विरुद्धस्मृतीनामप्याचार्यैः प्रामाण्योक्तेः तद्व्याघातमाशंक्योक्तम् अननुष्ठानेति। प्रमितिजनकत्वरूपं तु न तत्स्वीक्रियत
इति भावः। इहेत्यत्र इति स्मृत्याचारयोः स्मृत्योः विशेषः प्रामाण्याप्रामाण्यरूपः। एकेति। एकेन स्मृत्यनुमानेन प्रत्यक्षं तदितरतयोः अं
तरितप्रामाण्यकयोरित्यर्थः। अविशेषात् तुल्यबलविशेषाभावात्। आचारात् कर्तव्यतास्मृतेश्चाकर्तव्यतेति प्रवृत्तिनि
वृत्त्योरन्तराप्यरूपस्य महत्संकटमित्याशंक्याषोडशिग्रहणाग्रहणवद्विकल्पोपपत्तिरित्यभिप्रेत्य पूर्वपक्षमुपसंहरति
तस्मादिति। तस्मात् प्रामाण्यविशेषादित्यर्थः। समाज्ञ्यतरानवाध्येत्यर्थः विप्रतिपत्तिः उदाहृतस्मृतिरेव प्रमाणमा
चार एव प्रमाणमिति विरुद्धनिश्चय इत्यर्थः। स्मृतेरैकान्तिकं प्रामाण्यमाचारस्य तु द्व्यन्तरितमिति श्लोकेन दर्शयन्नि
ष्टान्तमारभते स्मृतस्येति। प्रत्ययोऽत्र विश्वासो वेदतत्त्वज्ञानं च तन्त्रेणोपात्तं तत्सहितामन्वादयस्तत्त्वाहि स्यं चक्रमाद्वि
षयतया आश्रयतया च ते गता तेस्मनेन स्मृतेर्विश्वसनीयवेदतत्त्वज्ञकर्तृकत्वात्प्रामाण्यदृढनिश्चयः साक्षाच्छ्रुत्य
नुमापकत्वयोग्यताद्वैकान्तिकं प्रामाण्यमाचारस्य तु प्राप्तजनककर्तृकत्वेन तद्योग्यताद्वारा विश्वसनीयतं स्मृत्यनु

४६ मानद्वारेणचव्यंतरितंप्रामाण्यमितिस्मृतेराचारादुत्कर्षो दर्शितः। उत्कर्षांतरमाह सोपनिबंधनेति। उपनिबंधनमि
त्युक्ते विप्रकीर्णत्वपरप्रकरणागतत्वसिद्धवन्निर्देशकल्प्यत्वादिनातिरोहितान्विधीनुपसंहृत्य तत्प्रतिपाद्यकर्मणां
46 कर्तव्यत्वकथनं तद्युक्तेत्यर्थः। अनेन चाचारस्य स्वरूपमात्रं दृश्यते न तु कर्तव्यतावसीयत इति ततः स्मृतेरुत्कर्षो दर्शि
तः विशेषणद्वयफलमाह तेनेति। अर्थसिद्धमप्याचारापकर्षं स्पष्टमाह अनिबंधनादिति। कर्तव्यत्वकथनरूपनिबं
धनमपि नास्ति उक्तोपसंग्रहरूपमपेतइतिद्योतनायोपेपसर्गसागः। एतच्चोपलक्षणमप्रत्ययजनकतर्कादिरप्य
बोध्यं। श्लोकं व्याचष्टे प्रत्ययितेति। प्रत्ययपदमुक्तद्व्यर्थकं। गुणशब्दोपि तदर्थद्व्यपरः। चारित्रमाचारः। विस्रंभणीय
मिति। विस्रंभो विश्वासः प्रामाण्यनिश्चयः। एतेनाचारस्य द्वारगविश्वसनीयत्वं सूचितं। आद्यविशेषणस्यैवं तात्पर्या
र्थमुक्त्वा तस्यैव तात्पर्यार्थांतरमाहापि चेति। विप्रकीर्णाश्च परप्रकरणागताश्च आदिना सिद्धवन्निर्देशानात्पर्यगता एम० ४६
श्चयस्तास्तासामुद्धरणेन संकलनेनाख्यातीति। विमता आचाराः स्मृतिमूलकाः श्रुतिस्मृत्यविरुद्धत्वे सति धर्मबुद्ध्या

क्तस्य न मित्रकर्तृकाचारत्वात् व्यतिरेके रादर्शादिवदित्यनुमानेनेत्यर्थः। स्मृत्याक्तस्यानुमानं तु स्मृत्यधिकरणे दर्शितं।
एवमाचारस्यापि विशेषणाभावहेतुमपकर्षमुक्त्वा अनिबंधनत्वहेतुमाह अपि चेति। विमर्शमेवाह अर्थसुखेति। क
ल्पयितव्येति। विमतो विधिबोधितप्रवर्त्तनाविषयः अर्थसुखेच्छाहेतुकत्वे सति शिष्टाचारत्वादित्यनुमातव्येत्यर्थः
।मूलकल्पनं विधायकस्मृत्यादिकल्पनं। एवं स्मृत्यविरुद्धानामाचाराणां स्मृतितो विप्रकर्षं प्रामाण्यमुक्त्वा तद्विरुद्धा
नां तु तेषां विप्रकृष्टमपि प्रामाण्यं नास्तीत्याह सर्वेषां चेति। कथंचित् विकल्पाश्रयणेनापि।ऽसंभवाभ्युपगमं नोक्त्वाऽभ्यु
पगमं सृजति न चेति। असंभवे हेतुमाह वक्ष्यतीति। अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीत्यादि
क्त्वर्थस्थले तु निषेधेन ग्रहणस्य क्रतूपकारकताभावो न बोध्यते किंतु ग्रहणाभावस्य क्रतूपकारकत्वमात्रं बोध्यते
ततस्तत्रैव कस्येव वक्ष्यतो विधिनिषेधाभ्यां विरुद्धत्वभावद्बुप्यानापादनात्ततो वैषम्यमत्रेत्यभिप्रेत्य प्रकृते विरुद्ध
यापत्तिं दर्शयति न हीति। विनिगमकमाह तत्रेति। उपसंहरति इति सिद्धमिति॥ ॥त्रिवृच्चर्वैश्वपालादेर्न्नौकेन्योऽ

४७ र्थः प्रतीयते। वेदे तदभियुक्तैः स्मृतस्तस्मादन्यो विलक्षण इत्यादिना पुनः पिष्टं तं वर्णकान्तरं दर्शयन् पूर्वपक्षवार्त्तिकायपादं सू
त्रस्थानीयत्वेन लिखति। वि हृष्टवृद्धस्थवालादेरिति। विषयसंशयावाहपत्रेत्यादिना। यत्र त्रिवृद्धादिशब्देषु लोकतोऽन्यो
वाक्यशेषाच्चान्योऽर्थ इति तयोः संबंधिनी अर्थगोचरा विरुद्धप्रतिपत्तिस्तत्र संशय इति योजना। विप्रति- त्तिं दर्शयति
पथ्येति। लोकादिति। त्रिवृद्रज्जुरित्यादिव्यवहारादित्यर्थः। वाक्यशेषादिति। त्रिवृद्धहिष्पवमानमित्युक्त्वा उपास्मै गाल
ता नर इत्यादीनां स्तोत्रसाधनभूतानां नवानामृचामाम्नानाच्छ्रौतान्तरेण वभिलक्ष्य वंतीतिस्त्रिवृत्त्वाच्चेतिभावः। वाक्यशेषादिति।
अदितिमोदनेनेत्यस्मादित्यर्थः। अश्वस्य वाल इति योगादिति शेषः। वाक्यशेषादिति। यज्ञो वै देवेभ्योऽश्वो भूत्वा पाक्रा
मत् सोऽपः प्राविशत्। स वालधौ गृहीतस्तान्वालान्मुक्त्वा विवेश इत्। ते वालाः काशतां प्राप्ताः कापेतिः प्रत्ततस्क्ते इत्यस्मा
दित्यर्थः। वार्त्तिके आदिपदसंगृहीतमाह ऐक्षव्याविति। काशमूलपरो वाक्यशेषो मृग्यः। तुल्यबलत्वमिति। ततश्च राम
तत्प्रतिपत्त्योरपि तुल्यबलत्वमिति शेषः। उतेति। वाक्यशेषवलीयस्त्वादिति शेषः। ननु वेदस्य धर्मे प्रमितावन्तरंगत्वान्न ४७

त्वासिद्धेः प्राबल्यात्कथं तुल्यबलत्वमित्यत आह पदेति। पदार्थस्य पदसंबंध इति विग्रहः। धर्मविषये लोकस्य बहिरंगत्वे
ऽपि पदपदार्थसंबंधविषये नासौ ततोऽन्यूनः इत्यर्थः। ननु वाक्यार्थस्य वाक्याधीनत्वाद्विध्युद्देशादेव त्रिवृदादिपदार्थसंसर्ग
रूपवाक्यार्थबोधात्किं लोकाद्यनुसरणेनेति मुग्धाशंकां परिहरन्नुक्तं व्याचष्टे विधीति। सति हि पदार्थज्ञाने वाक्या
र्थधीः पदार्थ एव संदिग्धो लोकादिना बधापितः इत्यर्थः। अन्यपीति। पदे तावदवगम्यत इत्यन्वयः। तस्य त्रिवृदादिश
ब्दस्याभिधेयं किमिति जिज्ञासायामन्यतः लोकाद्वा कर्मशेषाद्वावगतमित्यर्थः। तत्रैतत्सादित्याख्यातार्थः। अधिकं वेति। वाक्य
शेषगतपदार्थस्तु सन्नेऽपि लोकाधीनतादित्यर्थः। ननु तस्याः लोकाधीनत्वेऽपि पदार्थनिर्णये तस्य लोकादन्यून
नत्वमित्याशंकाभ्युपेत्याह इत्यर्थे द्वयमिति। एतदुक्तं तस्यापि पदस्यागत्या आह इति स्वीकारात्त्रिवारं बहिष्पवमानेऽकर्त्त
व्यमिति वाक्याद्व्यवच्छेनकर्त्तव्यमिति वाक्यार्थबोधाद्धि पवबहिष्कत्वेनानुष्ठानमित्यर्थः। वाक्यैकत्वमिति। विधिना
त्वेकवाक्यत्वादिति न्यायस्तिद्धमिति शेषः। विधित्सितो विध्युद्देशार्थवादयोः। विषयेकात् अर्थैकात्वे नाएकवाक्य

त्वात्पार्थैकावश्यंभावेन बलीयस्त्वमिति। विधिस्तु सोऽभिन्नविषयत्वे विध्यविषयस्य स्तुत्यानर्थक्यादानर्थक्यप्रतिहतानां वि
परीतं बलाबलमिति न्यायेन वाक्यशेषस्याबल्यमिति भावः। यद्यपि त्रिवृत्ति अड्डुवकाम्नानं नार्थवादः किं त्वड्डुवक
विध्यर्थं तच्चावाक्येकेऽपि संभवति तथापि तस्य तद्विधिमात्रार्थत्वे विध्युद्देशे त्रिवृत्सदवैयर्थ्यापत्तिः न चैतै गुणपविधाने
न तत्साफल्यमष्टदोषदुष्टविकल्पापत्तेः तस्मात्तद्धि तं तदाम्नानं तस्य अड्डुवकाभिधायकत्वपरमितीहापि वाक्यशेषान्नान्निर्ण
यइत्याशयेनश्लोकं व्याचष्टे पदीति। संबन्धः विधिनासहार्थवादस्य विधेयप्रस्तावकत्वरूपः। अड्डुवकाम्नानस्य विध्यनुगुण
तात्पर्यकत्वरूपइत्यर्थः। तस्मात्तदुक्तसंबन्धावश्यकत्वात्। तदनुगुणाः वाक्यशेषानुगुणाः नन्वस्याधिकरणस्यदाशमिके
नपुनरुक्तिः तत्र हि त्रिवृदग्निष्टुदित्यादौ त्रिवृच्छब्दस्य स्तोत्रीयानवकार्थकत्वं वक्ष्यतइत्याशंक्यापरिहरन्नुमेतदधिकरणा
न्तिइममर्थमनुवदतिइत्येतावदिति। सतिवाक्यशेषे तदनुगुणार्थो ग्राह्यइत्येतावदित्यर्थः। एतदुपजीवनेनदाशमि एम
कवक्ष्यमाणमाहृयदाचेति। अवधारितमित्यनंतरं तदेति पदं द्रष्टव्यं। वक्ष्यतइति। एतन्न्यायसिद्धैरूढिबलीयस्त्वेनतद ४८

र्थकत्वस्य तत्र वक्ष्यमाणत्वात्तस्य चैतदधिकरणप्रयोजनत्वानुपपत्तेरित्यर्थः। चरुशब्दस्य त्रैगुण्यपक्षाद्रूवकोभयशक्त
त्रिवृच्छब्दे वैलक्षण्यं वदन् दार्शनिकचर्वधिकरणस्य पूर्ववदेतदधिकरणप्रयोजनत्वानुपपत्तिरित्याह चर्विस्यादिना न
। चरुशब्दः स्थाल्यां लाक्षणिक इत्यन्वयः। अपि शब्दस्त्रिवृच्छब्दवन्नानार्थत्वेन प्रसक्तोपीत्यर्थकः। लक्षणाबीजं संबंधमा
ह ओदनेति। एतेन त्रैगुण्यपक्षाद्रूवकयोर्लक्षणाबीजसंबंधाभावात्त्रिवृच्छब्दस्य नानार्थकत्वमिति सूचितं। ओदनेत्यादि लाक्षणि
कः स्थाल्यां शक्त इति किं न स्यादित्यत आह वाक्येति। उभयत्र शक्तिरस्तु तत्राह न्यायश्चेति। तेन ओदनशक्तत्वनिश्चयेन ओ
दनवचनत्वमेव न तु लाक्षणिकस्य स्थालीपरत्वं शक्तेर्लक्षणातो बलवत्त्वादित्यर्थः। रूढत्वादिति। यद्यपि दीर्घेण लक्षणा
प्रयत्नानां काशनामश्वकेशेः स्यादृश्यमस्ति तथापि गौणत्वस्य पदान्तरसंबंधाधीनत्वात्पदान्तरसापेक्षत्वेसामर्थ्या
भावादाश्ववाल इतित द्विताना पत्नेर्गौणत्वे ऐक्षवीशब्देतु गौणमनाशंक्यमेवेति भावः। अन्यत्रापि वाकाशेष
रहितस्थलेपि अध्यायोपांत्याधिकरणेन पौनरुक्त्यमाशंक्य परिहरति न चेति। असंदेहादिति। तत्र त्यक्ताः शर्करा

४९ उपदर्ष्यादित्युक्तशाब्दोक्तां जनसाधनेद्रवद्रव्यमात्रेज्ञाने किं तद्घृतं तैलमन्यद्वेति संदेहे तेजोवैघृतमिति वाक्यशेषाद्घृ
तनिर्णयः कृतइहतु न तया संदेह इत्यर्थः। तदेवाह इहेति। अर्थोतरं त्रैगुण्यादि। तथा च वाक्यशेषस्य संदेह
निवर्तकत्वेपि प्रबलविपरीतनिश्चयनिवर्तकत्वं न संभवतीत्यधिकाशंकानिराकरणायेदमधिकरणमित्यर्थः॥ ॥
चोदितं तु॥ पूर्वोक्तस्य म्लेच्छप्रसिद्धप्रामाण्यस्यापवादात्संगतिरित्याशयेनाह [illegible]र्थेति। उक्तमिति। भाष्ये पवादिश
ब्देष्ववार्तिके पील्वादिशब्देष्विति शेषः। क्वचिदिति। कोकिलादिषु पिकादिपदप्रयोगो लौकिक एव तदधिकरणमूल
इति भावः। कोकिलेति। पिकशब्दः कोकिले नमशब्दो ईसनशब्दः शततच्छिद्रपरिमंडलदारूपात्रे तामरसशब्दः पद्मे इ
त्यर्थः। विचारप्रयोजनमाह ततयदीति। तेषामिति। पिकमालभेतनसतेहिरण्यं निधायेत्यादिचोदनागनानामिति शे
षः। सापि म्लेच्छप्रसिद्धिरपि। सेव म्लेच्छप्रसिद्धिरेवानुवार्तिके म्लेच्छप्रसिद्धेरपि प्रामाण्यमंगीकृत्य तस्या निरूक्ता राम·
दिप्रसिद्ध्या बलाबलविचारस्याप्यत्र कृतत्वात्कथं प्रामाण्यमात्रमुक्तमित्यदिन्न परत्वमस्येत्याशंकाधिकरणशरीरं प्रा ४९

मारापव्युत्पादनमेवश्राचार्यैस्तन्यतः सिद्धमेव प्रसंगादत्रोक्तमित्याह तत्रेत्यादेति । इयमेव निरूक्तादिप्रसिद्धिरेव
। अन्यतः कुतः किं सिद्धमित्यपेक्षायामाह शिष्टेति । शिष्टाकोपाधिकरणप्रमाणाद्दौ । कीदृशं कादृक्बलाबलात्प्रमेयस्वरू
पगतमेव बलाबलं ज्ञापयद्दत्येनद्वाच्यितमित्यर्थः । ततः किमित्याशंक्य तेनेवगनार्थत्वात्प्रासंगिकमेवेतत्प्रामाण्य
त्पादनमेवाधिकरणार्थइत्याह तेनेवेत्यादिना । ननु शिष्टाकोपे प्रमाणाबलाबलात्प्रमेयबलाबलं ज्ञापयद्द्युक्तमिह
त्वाश्रयबलाबलात्स्वरूपबलाबलं ज्ञापयद्द्युच्यते ततो भेदादगतार्थता तत्राह प्रायमिति । पयो र्वाध्यबाधकभा
वो विचार्यते तत्स्वरूपगतं बलाबलं तत्संबंध्यन्यगतबलाबलापेक्षया ज्ञायः स्वरूपापेक्षयान्यस्य बहिरंगत्वादि
त्येवं न्यायशरीरमुभयत्र समं । न तत्र न्यत्किंचित्प्रमाणांकचिदाश्रयद्दत्यपदेनदितिभावः । वार्त्तिककारीयो बलाब
लविचारः प्रासंगिक इत्यत्र गमकमाह भाष्यकारेणेति । अस्य चिंसनइत्यनेन संबंधः । तुशब्दोवधारणे । श्लोके
पदार्थानामित्यस्य द्वंद्वसमासत्वं । विप्रुतिमूपपद्मीत्यनयोरपभ्रंशवाद्युत्पार्थत्वंच दर्शयन् श्लोकं व्याचष्ट पदानीति

५० पदानामपभ्रंशानामाञ्चाप्रयोगः निर्विभक्तिकत्वेन विभक्त्यंतवैदिकपदवैलक्षण्यं च अर्थानां तु गौणताद्यापत्तिः
कचित्प्रातिपदिकमात्रस्याविकृतत्वात्स्यादेतत्पुनरुक्तं । इत्वशाद्वा वाक्यालंकारे फलितमाह अतइति । वैदिकपदतदर्थभि
50 न्नत्वान्म्लेच्छगतपदतदर्थानामित्यर्थः । नन्वार्यवन्म्लेच्छा अपि तदविप्लवे यतंते अन्यथा व्यवहारविप्लवापत्तेरतस्त
दविप्लव एवेसाशंक्याह नहीति । दृष्टार्थव्यवहारस्य यथाकथंचिदपि संभवादिति भावः । ननु तर्हि पिकादिपदानां म्ले
च्छप्रसिद्धार्थत्यागे आर्यप्रसिद्धिकस्य चिदर्थस्याप्रसिद्धेस्तद्घटितचोदनानामानर्थक्यं स्यात्तत्राह निरुक्तादीति । जर्भर्या
दिवदिति भावः । दर्शनादिति । प्रत्यभिज्ञानादित्यर्थः । विभक्त्यभावे पि प्रातिपदिकांशस्य वेदगतं देशेषु प्रत्यभिज्ञायमा
नत्वात्तन्नान्यत्वमिति भावः । अविप्लुतानि अनपभ्रंशरूपाणि अभिन्नानीति यावत् पदाविप्लवे फलितमाह तेषां येति
। पदानामित्यर्थः । निसे नत्र अविप्लुते नार्थे नेत्यन्वयः । ननु पदैक्ये पि पील्वादिवदर्थविप्लवो स्तु तत्राह आर्येष्विति । अ एम०
सो नित्योर्थः । यतः नित्यार्थस्त्वात् म्लेच्छेषु विप्लुतिर्गौणत्वादिरूपा कल्प्येत तथा सो नित्यो ऽर्थ आर्येषु नास्तीति योजना ५०

।निरुक्तादिना ब्रह्मणादिविभागेनार्थकल्पनाया अनियतत्वान्न ततो निःसार्थत्वाभोजः मर्यादो त्वगत्या तदनुसरणमिति
भावः।फलितमाह ग्रन्थ एवं प्रसिद्ध एवेति। अर्थो मुख्यार्थः। तेन मुख्यार्थस्यान्यस्याभावेन। ग्लौकं व्याचष्टे पिकेति। अधिकर
णार्थमुपसंहरति नत इति। पील्वादिव्यवच्छिन्नमित्यविरुद्धं चेति। निरुक्तादिकल्पनाकृतत्वं प्राबल्यहेतुमाह प्रसिद्धेति
।म्लेच्छैर्म्लेच्छत्वादितं अवहृतमपि प्रतीयेत यत्नात्संप्रादिति यावत्। प्रमाणेनार्थव्यवहारेण विरोधात्॥ ॥४॥ ॥शंका
वसरणप्रभाष्योक्तमाह अत्रेति। क्रतुप्रयोगं पाठमात्रेण स्पष्टं कल्पयंतीति कल्पा बोधायनीपादयः स्वकृतसंज्ञापरिभाषा
दिभिः प्रयोगस्य सूचकान्याश्वलायनीपादीनि सूत्राणि न त्विह भाष्ये कल्पसूत्राणां प्रामाण्यमिति पूर्वपक्षं कृत्वा तद
प्रामाण्यं व्यवस्थाप्यते। तत्र स्मृत्यधिकरणोक्तसर्वस्मृतिप्रामाण्यव्यवस्थापनेन विरुद्धमिति शंकते नन्विति। इत्नेति। त
था चोक्तरीत्या तद्विरोध इत्यर्थः। [redacted]। आह परिहारमिति शेषः। तत्र स्मृत्यधिकरणे अप्रमाणतया अ
वेदमूलकतया प्रमाणं इति। मूलवेदेत्यर्थः। एतानि कल्पसूत्राणि। वैदिकेति। तत्पक्षे वेदविहितार्थनिबंधनत्वादित्य

५१ र्थः। प्रत्यक्षशास्त्राणि प्रत्यक्षवेदमूलानि। तथा च प्रत्यक्षवेदमूलेषु वेदमूलत्वाभावपूर्वपक्षस्यानुमेयवेदमूलकत्वसि
द्धांतस्य च कल्पसूत्रेष्वप्रवृत्तेर्नैतस्याधिकरणोदाहरणत्वमिति न तद्विरोध इत्यर्थः। सिद्धांतविषयत्वमेव स्पष्टयि
51 तुं स्मृतीनां कल्पसूत्रवैषम्यमाह स्मृत इति। इतस्ततो विप्रकीर्णत्वं परप्रकरणगतत्वं वाक्यशेषगतसिद्धवन्निर्दे
शान्यथानुपपत्तिकल्पितत्वं चेति शेषः। हित्प्रायत्वे हेतुत्वर्पतत्राद्यस्याष्टकादिस्मृतिमूलश्रुतिषु प्रागेवोक्तत्वाद्द्वितीय
स्य दर्शपूर्णमासगतमलवद्वाससोऽव्रतविधानादेरपि इत्यादेश्च वाक्यशेषगतसिद्धवन्निर्देशाकल्पितविधीनुदाहरति।
तथेति। निर्दिष्टमिति प्रसिद्धवाचिहिशब्देनेति शेषः। दीक्षितदक्षिणानयनां जनपाथस्यमनित्रसाधारणेनत्तोनुमि
तिभावः। तत्र विधिकल्पननिमित्तमाह तच्चेति। दृष्टार्थत्वे चमानां तत्प्रवृत्तेरस्य च दृष्टप्रयोजनशून्यस्यमानां तत्राप्र
तं भवाद्यानस्य च सिद्धवन्निर्देशः क्वचिच्छ्रुतो विधिर्विना नोपपद्यत इति मातृषीणां स्वयमनयनां जनपाथस्यापि विधिः राम. ५१
कल्प्यत इत्यर्थः। सिद्धवन्निर्देशान्तरमाह तथेति। आदित्यग्रहस्य हि देवस्य ग्रहेभ्यो ग्रहणांसार्थवादमत्ति देवा वेय —

द्रुद्रमंतरायन्सं आदित्या नन्वाक्रमत ते द्विदेवत्यान्प्रापद्यंत तान्न प्रतिप्रायच्छन्न् तस्मादपि वध्यं प्रपन्नं न प्रतियच्छंतीति त
स्माद्द्विदेवत्येभ्य आदित्यो निर्गृह्यत इति। देवा यज्ञं कुर्वत तस्मिन्यज्ञे रुद्रं विस्मृतवंतः स च रुद्रः आदित्यान्देवानन्वधाव
त्ते देवा द्विदेवत्यान् शरणं गताः तान् देवान् द्विदेवत्या रुद्राय नार्पितवंतः तस्मादद्यत्वेपि वध्यमपि शरणागतं न प्रत्यर्प
यंति तस्मादादित्यग्रहदेवतानामादित्यानां द्विदेवत्यग्रहेषु सन्निधानाद्द्विदेवत्येभ्यो ग्रहेभ्य आदित्यग्रहं निर्गृह्यते निर्ग
ह्येत तच्च न तस्मान्न प्रतिप्रयच्छंतीति सिद्धवन्निर्देशाच्छरणागतो न प्रत्यर्पणीय इति विधिः कल्प्यत इत्यर्थः। सिद्धवन्निर्दे
शं तदेमाह तस्माद्धर्मेति। अविज्ञातो वा एष गृह्यते यदाग्रयणः स्थाल्या गृह्णाति वायव्येन जुहोतीति विधिशेषस्तस्मा
द्धर्मेत्यादिः। आग्रयणाख्यो ग्रहः स्थाल्या ग्रहणसमये देवा दिवीति मंत्रे ऐंद्रवायवादिमंत्रवद्देवताविशेषविज्ञानाभा
वादविज्ञातो गृह्यते तत्स्थाल्या गृहीतस्याविज्ञातत्वात्स्थाल्यैव होतव्यं किंतु स्थालीगतं सोमं वायव्येनोर्धपात्रेण पुन
र्गृहीत्वा तेन जुहुयादन्यथा सति वाममद्य सवितरित्यादिषु पुनर्ग्रहणार्थमंत्रेषु होमार्थमंत्रेषु च सवित्रादिदेवताविशेष

५२ 52 विज्ञानसत्वादविज्ञानत्वदोषःपरिहृतो भवति। अविज्ञातस्य च दोषत्वं तस्माद्गर्भहत्येत्यनेनोक्तं। गर्भिण्या वधे गर्भस्यावि
शेषतो ज्ञानाभावाद्ब्रह्महा भवतीत्येवं सिद्धवन्निर्देशात् तद्वधे ब्रह्महत्याव्रतं कार्यमिति हत्वा गर्भमविज्ञातमेतदेव व्रतं च
रेदिति स्मृतिमूलं कल्प्यत इत्यर्थः। अत एवेति। तिरोहितविधिमूलत्वादेवेत्यर्थः। एषु अष्टकादिषु। प्रत्यक्षेति। अष्टका
दादीत्यादिः। श्रौतत्वमिति प्रसिद्धमिति शेषः। ननु स्मार्तश्रौतविभागस्य तिरोहितातिरोहितविधिमूलकत्वनिबंधनत्वे
गौतमोक्तिविरोधः तत्र हि गार्हस्थ्यश्रौतत्वं प्रत्यक्षश्रुतिमूलकत्वनिबंधनमुक्तं ततस्तस्मार्तत्वं नित्यानुमेयश्रुतिमूल
कत्वनिबंधनमिति गम्यते तत्राह इत्यमेव चेति। तिरोहितविधिमूलकत्वैलक्षण्यमेवाभिप्रेत्य गार्हस्थ्ये प्रत्यक्षशब्दः
प्रयुक्त इत्यर्थः। गार्हस्थ्यस्येति। स्मृतौ श्रेष्ठ्यमिति शेषः। अनुमेयत्वमिति। नित्यानुमेयश्रुतिमूलत्वरूपमित्यर्थः। अभि
प्रेत्येत्यनुषंगः। तदनभ्युपगमादिति भावः। तदनभ्युपगमे हेतुं प्रागुक्तं स्मारयति अबंधेति। क्वचित्कल्पितविधिमूलकत्व राम॰
मस्तीत्यत्र गमकमाह अत एवेति। कल्पितविधिमूलकत्वादेवेत्यर्थः। स्मृतेः स्मृत्यर्थस्य अनुष्ठानं विरोधाधिकरणो ५२

क्षमनुपपद्यत इति शेषः। ननु कल्पितविधिमूलकत्वे प्रत्यक्षश्रुतिविरोधेऽपि विधिमूलकत्वाविशेषात्स्मृत्यर्थस्य विधिमूल
कवदनुष्ठानं किं न स्यादित्याशंक्य न्यायाभासेन विधिकल्पनाशंकया ऽननुष्ठानमुपपादयितुमतः शब्दार्थं तावदाह स्मृ
तयो हीति। किं तावत्तेनाह कल्पनाचेति। अनुपपन्नो ऽभासरूपो भवतीत्यर्थः। ननु कल्पनायामपि प्रत्यक्षश्रुतिमूल
त्वसंभावनया ऽनाभासत्वधीः किं न स्यादित्याशंक्य तर्हि प्रत्यक्षश्रुतिविरोधश्रुत्यन्तरसंभावनाभ्यां विप्रतिपत्तिरेव भव
तीत्याह तेनेति। अविरुद्धविषयवदिति। विधिकल्पनामात्रे दृष्टान्तः। प्रवृत्ताप्रवर्तिताद्यं तेषु निशोरिति। सायंप्रातरि
त्यर्थ दृष्टप्रवृत्तेरस्त्वनुषंगः विचिकित्सा संशयः। नन्वेवं विचिकित्सातः किं पाक्षिकमपि स्मृत्यर्थस्यानुष्ठानं स्वीकार्यं ने
त्याह यावदिति। एवं स्मृतीनां कल्पसूत्रवैलक्षण्योपपादनस्य फलमाह तेनेति। अनुमेयश्रुतिमूलकत्वसिद्धान्तयोग्य
त्वेनेत्यर्थः। तत्र स्मृत्यधिकरणो। नेति प्रत्यक्षश्रुतिमूलकत्वादिति भावः। भवतु वा कल्पसूत्राणामपि तदधिकरणावि
षयत्वं तथापि न विरोधः स्यात् अन्तराऽप्रामाण्याभावपरत्वाद्भाष्यस्येत्याशयेनाह किंचेति। इतीति। चिंतेत्यनुषंगः। तर्हि स्मृ

५३ तीनामपि तथैव वेदविचारः स्यादित्याशंक्योक्तपक्षापक्षांतरमाह। यद्वेति। निराकरणमिति। क्रियत इति शेषः। अंग
परिग्रहे पूर्वपक्षसौकर्यं हेतुमाह। तेषां हीति। निरस्त इति विरोधाधिकरणादिति शेषः। वार्त्तिककारस्याभिमतं पक्ष
53 माह। तद्देतानीति। यद्यपि पूर्वैरपि पक्षास्तदुक्ता एव तथापि तदनभिमतास्त इति तत्र केचिदित्युक्तिः। चत्वारीति। कल्प
सूत्रमन्वादिवचनांगशाक्यादिग्रंथरूपाणीत्यर्थः। तद्विचारे हेतुः समानेति। एवं च पिकादिशब्दार्थनिर्णये म्लेच्छप्र
सिद्धेः स्यात् तं च्छेणप्रामाण्यं वेदेतेषामपि स्वातंत्र्येण प्रामाण्यमित्युत्थानात्संगतिर्बोध्या। अपौरुषेयत्वे वेदवत्स्वातंत्र्ये
ण प्रामाण्यं पौरुषेयत्वे तन्नेति फलफलिभावः। शाक्यादिग्रंथानामप्रामाण्यस्य पूर्वं व्यवस्थापितत्वेन स्वतः प्रामाण्य
उरूपपादमितिनिमत्वात् तन्नेवादान्नुपपादयति। तत्रावगतिरिति। एतेभ्यः शाक्यादिग्रंथेभ्यः स्वत इति प्रामाण्यस्वत
स्त्वस्य तर्कपादे स्थितत्वादिति भावः। दृष्टेति। दृष्टं स्वतः प्रामाण्यं तदानुगुण्यादित्यर्थः। अपौरुषेयत्वमिति ततश्च एम०
वेदवत्स्वातंत्र्येण प्रामाण्यमिति शेषः। अविगीतमिति। अबाधितमित्यर्थः। वैदिकपरिग्रहादिति भावः। तन्न ५३

स्मात्स्वप्रामाण्यात् एषां मन्वादीनां इतीति इति विमर्शे सतीत्यर्थः। ज्याय इति। लाघवादिति भावः। ततश्च वेदवत्स्वा
तंत्र्येण प्रामाण्यमिति शेषः। अपौरुषेयत्वमिति अत्रापि पूर्ववत् शेषो बोध्यः। पठितेति पठितस्य पाठः पाठ्य
रूपरेति यावत् तेन प्रत्यक्षो मो वेदस्तदर्थोपनिबंधनात् अनुपलस्य वेदार्थोपनिबंधनादेव वेदार्थं बुध्वा विरचि
तत्वरूपं पौरुषेयत्वमेव किं न स्यात्तत्राह नहीति। नन्वपौरुषेयत्वे बौद्धादिसमाख्यानुपपत्तिस्तत्राह बुद्धेति। प्र
वचनमध्ययनं। न तु न केवलं समाख्या किंतु लोके मन्वादयस्तत्कर्त्तारः स्मर्यंते तत्राह तन्निमित्तेति। प्रवचननि
मित्तेत्यर्थः। नन्वेतेषामपौरुषेयत्वे वेदवदविच्छिन्नाध्ययनपरंपरास्मादित्वाशंकेष्टापत्तिरित्याह भवतीति। अ
त्रापौरुषेयत्वसाधके अविच्छिन्नाध्ययनेऽप्रयोगोऽनुमानं। बौद्धेति आदिना कल्पसूत्रादिष्वानत्रयसंग्रहः।
सिद्धसाधनवारणाय सर्वमिति हेतौ बौद्धेत्यत्रापि पदं दृष्टव्यं। बौद्धाद्यध्ययन नत्वादित्यर्थः। रघुवंशाद्यध्यय
ने व्यभिचारवारणाय बौद्धेति। भागासिद्धिवारणाय आदिपदं कल्पानां तु विशेषमाह कल्पानामिति नित्यता अ

५४ पौरुषेयता। नित्यविधिविषयत्वमुपपादयति स्वरूपनहति। इतिहासपुराणानामप्यपौरुषेयत्वमिष्टमितिभा
54 वः। कथमिति। नित्यानित्यसंयोगविरोधादिति भावः। कस्मान्नामपौरुषेयत्वमुपसंहरति तस्मादिति। तच्छब्दार्थ
मेवाह नित्येति। स्मातं चमपौरुषेयत्वं अत्रापि पूर्ववच्छेषो बोध्यः। ननु पौरुषेयत्वमसिद्धं तत्राह स्पष्टं चेति। ननु
कर्तुः स्मृतिः प्रवचनप्रयुक्तेत्यांतिरित्युक्तं मिस्यत उक्तं दृष्टेति। मन्वादिग्रंथेष्वेव मन्वादिकृतत्वस्योक्तत्वान्नभ्रांति
रिति भावः। दार्ढ्यमेवोपपादयति पुरुषेति। एवं ग्रंथेष्वं वकर्त्तारस्तद्रूपप्रश्नोनारः पुरुषपरंपरयास्मर्यंत मनुने
दं कृतमापस्तंबेनेदमित्येवं निबध्नंतेपरंपरयेति। कर्तृस्मरणं च कृतत्वमात्रेतात्पर्यं न तु जन्यजनकभावाभिप्राये
ण। अथवा कर्तृस्मर्त्तार एव पुरुषा अध्यापकवदविच्छिन्ना इत्यर्थः। न काठकेति। यथा काठकादिसमाख्या प्रवच
नप्रयुक्ते सम्प्रथानी तातथा स्मर्यमाणाः कर्त्तारः प्रवचनप्रयुक्ता न तु कर्त्तार इति स्मर्यंत इति नं तु शाकं तत् इत्यर्थः। राम॰
अशक्यत्वे हेतुः ग्रंथेष्वेवकर्तृस्मरणां। अस्मदवधिस्मर्तृपुरुषाविच्छेदो वेत्युक्तमेवस्पष्टयति तत्रहीति। मा ५४

त्रपदेन कृतस्मरणाव्यवच्छेदः। अत्रत्विति। एवकारो भिन्नक्रमः। एषु वेदग्रंथेष्वित्यर्थः। सर्वेषामस्मदवधीनां यत्कृतं संग्रा
नां वेदत्वस्मरणं तदन्यथयति षड्विंति। यच्चोक्तं प्रत्यक्षवेदार्थप्रणायनं व्यर्थमिति तत्राह नानेति। अनपेक्षैः पुरुषै रि
ति शेषः। नादृष्टेन तादृशस्मृत्यर्थोपसंहारार्थत्वेन अनित्यत्वे नित्यविधिविषयत्वानुपपत्तिं परिहरति एवं विधाश्चे
ति। केनचित् क्रियमाणाद्दृष्टान्वयः। कल्पनानन्ग्रथनात्। नित्यपानित्यवेदार्थकल्पनाप्रयोगनिबंधनत्वेन नित्यया। उ
पसंहरति तस्मादिति। स्मार्तं श्रौतोपमानेन मूलश्रुत्यधीनं तु प्रामाण्यमिष्टमिति दर्शितं शाक्यादीनां तु सर्वथाप्रामाण्य
मेवेति विशेषमाह शाक्येति। कल्पादिष्विष्टमपि प्रामाण्यं न निरंकुशमित्याह कल्पादिष्विति। अविरोधादिति। व्याख्यातमि
दं विरोधाधिकरणभंगावसरे किं तत्र स्वपक्षशास्त्रं यद्विरोधादप्रामाण्यं तदाह सन्निहितं चेति। चकारान्यायविरोधो गम्य
ते। चतुर्होतृकरणानयेतयोश्चतुर्होतृकरणस्य निरस्तिष्यमाणत्वादिति भावः। न्यायविरुद्धं वचनांतरमुदाहरति तथेति। अग्नी
षोमीयपशोः पशुमालभ्य पुरोडाशं निर्वपतीति पशुयागे यादेवता तद्देवताकः पुरोडाशः यागांगत्वेन विहितः सवनी

५५ यपशावपि तथैव चोदकेन नित्यं प्राप्तः सकृच्चित्कृतः क्वचिदकृत इति विकल्प्यत इत्युच्यते इदं च विकल्पवचनं द्वाद
शाध्याये छिद्रापिधानार्थत्वात्पुरोडाशो न स्यादित्येषामेवमर्थत्वादित्यधिकारो सवनीयपशौ पशुपुरोडाशयागस्य नित्य
55 त्वप्रतिपादनात्तत्र स्य पूर्वपक्षमूलमित्यर्थः। कुत इत्यपेक्षायां तत्पूर्वपक्षोक्तहेतोर्विकल्पसूत्रकारेणोपन्यासादित्या
ह अन्यत्रेति। अन्यत्राग्नीषोमीयपशुगतपशुपुरोडाशयागे अग्नीषोमपशौ विच्छिद्रमपिदधातीति वपोद्धारणप्रयुक्तछिद्रापि
धानार्थत्वस्योक्तत्वादिह च छिद्रापिधानस्यानुसवनं सवनीयानि रूप्यन्ते अपि हि सा अच्छिद्रता या इति सवनीयपुरोडा
शैरेव सिद्धत्वगमान्न तदर्थं पशुपुरोडाशयागः कर्त्तव्य इत्यर्थः। अत्र चोक्तछिद्रापिधानस्यात्रत्यपक्षबाधितत्वात्तद्वचन
स्यार्थवादत्वाद्देवतासंस्कारार्थ एव पशुपुरोडाशयागः प्रकृतावितीहापि देवतासंस्कारा विलोपार्थं नित्यं कर्त्तव्य एव स
वनीयपशाविति सिद्धान्तपिण्डमारणात्वादस्यन्यायाभासमूलत्वमित्यर्थः। भावदिति। अर्द्धमन्तर्वेदि मिनोत्यर्द्धं बहिर्वेदी राम०
त्यत्र वाक्ये नवेदिबहिर्वेदित्वलक्षितो देशविशेषो यूपमानांगत्वेन विधीयत इति नान्तीयाधिकरणसिद्धान्ते कृत्स्नयूपा ५५

वटदेशस्यैवेद्यात्मकत्वमनपेक्ष्यमिति वक्ष्यमाणत्वाद्यूपैकादशिन्यां यावद्यूपप्रदेशं वेदिमानवचनमापस्तंबस्य तद
धिकरणपूर्वपक्षमूलमित्यर्थः। जाघनीमिति। पश्वेकादशिन्यामित्यादिः। पूर्वपक्षेति। हृदयाद्यनुनिष्पन्नजाघनीप्र
तिपत्त्यर्थत्वात्पत्नीसंयाजानां सर्वजाघनीनां प्रतिपत्तिलक्षणसंस्काराविलोपार्थं सर्वाभिः पत्नीसंयाजाः कर्तव्या इत्ये
वं पूर्वपक्षे इत्यर्थः। कृतइत्यपेक्षायां प्रत्यक्षशास्त्रविरोधादित्यभिप्रेत्य विरोधि शास्त्रमाह तत्राणीति। ननु ग्रहैकत्ववज्जा
घन्येकत्वमप्यविवक्षितमतः सर्वजाघनीनां प्रतिपाद्यते सा शंकाह विवक्षितमिति। उपादेयेति। दर्शपूर्णमासयोराज्येन
सह जाघन्या विकल्पितत्वात्तत्र च तस्याः प्रतिपत्त्यप्रसक्तत्वाद्गुणभूतत्वात्तथैव पशावपि विकल्पेन प्राप्तो जाघन्येति वाक्ये
न गुणभूतायाएव तस्या नियमनेना प्रतिपाद्यत्वादुपादेयगतत्वं संख्याया विवक्षितत्वाज्जाघनीवद्भुत्वे यया कया चिज्जा
घन्या पत्नीसंयाजाः कर्तव्या इति सिद्धांतयितव्यमित्यर्थः। चमसेति। ग्रहं संमार्ष्टीत्यत्रैकत्ववद्ग्रहत्वमप्यविवक्षितं त
तः चमसेष्वपि सम्मार्गः कार्य इति पूर्वपक्षं कृत्वा ग्रहत्वस्य विवक्षितत्वप्रतिपादनेन च मसेषु सम्मार्गो न कार्य इति च

५६ 56 मसाधिकरणोसिद्धांतितं। तदधिकरणपूर्वपक्षमूलं। पुरोडाशं पर्यग्निकरोतीत्यत्रापि पुरोडाशत्वस्याविवक्षया सर्व
हविःषु पर्यग्निकरणमित्यर्थः। अस्मिन्वाक्ये पुरोडाशत्वमवश्यं विवक्षितमित्यत्र सौत्रव्यवहारं लिंगमाह पशुरिति प
र्यग्निकरणं सर्वहविरंगं चेत्पशोः पुरोडाशविकारत्वे पर्यग्निकरणाहृपहेतुप्रतिपादनमयुक्तं स्यान्नस्य हविरंतरसाधा
रण्ये पुरोडाशमात्रविकारत्वेहेतुत्वासंभवादित्यर्थः। प्रसक्तशास्त्राविरोधे कल्पसूत्राणामप्रामाण्यमित्यत्रैतदधि
करणागुणासूत्रसंगतिमाह तदिदमिति। सर्वस्मिन्नपि पूर्वपक्षे दर्शयागः कर्तव्यः सर्वस्मिन्नप्यपरपक्षे पूर्णमासयागः कर्तव्य इति कल्पसूत्रे प्रतिपादनादमावास्यायाममावास्यया यजेत पौर्णमास्यां पौर्णमास्या यजेतेति प्रत्यक्षश्रु
त्यसद्भावाच्चेत्यर्थः। न तस्मात्र प्रत्यक्षशास्त्रविरोधे सूत्रकारेणैव तेषामप्रामाण्योक्तेस्तत्स्यात्द्विशेषादुभौ वेस्या
दावप्रामाण्यमेवेत्यर्थः। सूत्रे प्रयोगशास्त्रं कल्पसूत्रं प्रमाणमिति चेत्॥ ॥अनु॥ संगतिं वक्तुं एतं कीर्तयति स्मृती
नामितिः। स्मृतीनां श्रुतिविरोधेऽप्रामाण्यविरोधाधिकरणे आचाराणां च स्मृतिविरोधे अप्रामाण्यं स्मृत्याचारविरो ५६

धेवेसत्र शाब्दप्रयोगरूपाचाराणां परस्परविरोधे ऽनार्यप्रयोगरूपाचारस्याप्रामाण्यं यववराहाधिकरणे प्रतिपादितं ते
षां परविरोधे प्रामाण्यं स्मृतिविरोधाकोपधिकनेमाधिकरणे प्रतिपादितं कल्पसूत्राधिकरणे च स्मृतीनां वेदवत्स्वातंत्र्ये
ण प्रामाण्यं निरस्तमित्यर्थः। संगतिमाह इदानीमिति। केषांचित् होलाकादीनां। स्मृतीनामिति। गृह्याणां स्मृतीनां चेत्य
र्थः। व्यवस्थेति। व्यवस्थया पूर्वपक्षसंकुलताया अव्यवस्थापासाधारण्येन सिद्धांतस्य तद्ध इत्यर्थः। एवं च विषयपरिशोधनेन तत्प्रा
माण्यपरिस्थिरीकरणं प्रामाण्यस्यासत्त्वाभावस्य वा सत्त्वेऽव्यवस्थाव्यवस्थाविचारानुपपत्तेरस्य संगतिरिति भावः। पूर्वप
क्षबीजं दर्शयति होलाकादय इति। होलाकावसंतोत्सवः। अर्कवृक्षपूजादयो दाक्षिणात्यैर्मीतगरापूजादयः प्रतीच्यैश्च
नापूर्वकं वृषभधावनरूपरथमयज्ञादय उदीच्यैरित्यादिशब्दार्थः। गृह्याणीति। कपालं भगालमिति ब्रूयाद्भद्रं भद्रमि
ति ब्रूयादित्यादिधर्मविशेषप्रतिपादकानीत्यर्थः। केचिदिति। गोतमगोभिलीये च्छंदोगैरेव वाशिष्ठं वा ह्वृचैरित्यादीत्यर्थः।
स्मृतमय इति। संति तत्रेति शेषः। कानिचिदिति। स्मृतिगृह्याणीत्यर्थः। ननु स्मृत्याचारयोः कर्तव्यतामात्रं गम्यते न तु

५१ व्यवस्थेति कथं पूर्वपक्षस्तत्राह तत्रेति। लिंगेतिस्य स्याचाररूपलिंगेत्यर्थः॥ लिंगिकर्त्तव्यतास्फूर्तिरूपं। ननु नायं
नियमः विनापि धूममयोगोलके वह्निदर्शनात्तत्राह स्मरतीति। तथा च विषमो दृष्टांत इति भावः। ननु लिंगस्य पक्ष
धर्मतावलाल्लिंगिनः पक्षसंबंधमात्रं सिध्यति नान्यसंबंधाभावस्तत्राह नहीति। विनाप्रमाणमन्यसंबंधकल्पनमप्रा
कामिति भावः। न चार्थापत्तिस्तत्कल्पिकेत्याह अवस्थितेति। प्रस्तुतबाधकमस्तीत्याह यदि चेति। तथा च केषांचिदनाचर
णां नस्यादिति भावः केषांचिदनाचरणमन्यथासिद्धमित्याशंक्याह यदिहीति। अनाचरणमालस्यादिनिमित्तं यदि स्या
त्तदा बाधकाभावेन साधारणानुमानं स्यादपीति योजना। अनुमानमिति। ननु तथानाचरणस्यालस्यादिनिमित्तकत्वं सा
धारणानुमानं च संभवतीति शेषः। कुत इत्यपेक्षायामाह यत्तदिति। आद्यस्तु दृष्टः प्रसिद्धपरः। अनाचरणमिति निय
मेनेत्यनुषज्यते। साधारणानुमानेऽइतरेषामनाचरणं नस्यात्तस्यालस्यादिनिमित्तकत्वे नियमेनानाचरणं नस्यादालस्या प.म.
देरनियतत्वादित्यर्थः। अत इति। नियमेनानाचरणस्य साधारणाश्रुत्यनुमानेऽनुपपत्तेरित्यर्थः। नतदिति। तस्यालस्यादि ५१

निमित्तत्वेनाप्युपपन्नस्याङ्कस्यनुमानेनंगत्वाभावादित्यर्थः। विशेषेति। व्यवस्थितविषयत्वे प्रमाणाभावमात्रेणेत्यर्थः
। सर्वेति। अग्निहोत्रादिवदिति भावः। विशेषणादिति। अनुमितत्वस्य तेऽर्थे किंचिद्विशेषणाविशिष्टपुरुषविषयत्वे व्यवस्था
स्यात्तच्च नोपपद्यत इत्यर्थः। पूर्वपक्षोक्तमनूद्य निराकुर्वन्पूर्वार्द्धं व्याचष्टे यदित्यादिना। विधिनेवेति। होलाकादयः कर्त्त
व्या इत्येवंरूपेणैवेत्यर्थः॥ नत्वग्निहोत्रादेः साधारण्ये विधिव्यतिरिक्तं प्रमाणमपेक्ष्यत इति भावः। व्यवस्थायामेव ब्राह्म
णो बृहस्पतिसवेनेत्यादिवत्प्रमाणं वाच्यं न च तदस्तीत्युत्तरार्द्धं व्याचष्टे व्यवस्थेति। न तु लिंगव्यवस्थैव प्रमाणमुक्तमि
त्याशंक्य प्रमाणाभावमुपपादयति। तथाहीति। तत्र स्मृतिलक्षणलिंगस्य कीदृशी व्यवस्थाभिमता किं व्यवस्थितवि
षयत्वरूपोत पाठव्यवस्थारूपा आद्य आह स्मृतपद इति। विदधतीति। धर्मानिति शेषः। साधारण्येन विधाने हेतुमाह न च ते
ष्विति। चरणाः शाखाः। स्मृतीनां साधारण्ये स्थिते किं लक्षणं व्यवस्थया किं न स्यात्तत्राह स्मृत्यनुसारीति। द्वितीय आह पाठे
ति। तच्चरणानां तच्छंदोगशाखितानां। ततश्चान्यथासिद्धा पाठव्यवस्थेत्यर्थः। धर्मत्वं धर्मविधायित्वं न प्रामाणिकमित्य

यः। स्वाधारणेन विधानादिति भावः। तदर्थं नन्वथासिद्धपा आचारव्यवस्थया व्यवस्थितश्च तत्रानुमानं स्यादित्यत्राह आचा
रणं त्विति — — — दीनामित्यादि। आहृतीति। ब्राह्मणो बृहस्पतिसवेनेत्रेवजातिः वैश्यामित्रो होजेत्सत्र विश्वामि
त्रवद्यक्तिः शुक्रो होतेत्स त्रेवगुणः अन्यूनं गात्रस्वित इति वत्संस्थानं वा नास्तीत्यर्थः। क्रियार्थं आदिशब्दः। यावतो
ऽर्घान्व्रतिगृह्णीयादित्येवं क्रियाविनास्तीत्यर्थः। समारव्येव विशेषणमित्याशंक्याह यच्चेति। केषांचिदिति दे
शां तदाशागनानामित्यर्थः व्यतिरेकव्यभिचारमाह विरेति। उपसंहरति तस्मादिति। नियमेनानाचरणं तु केषांचित्त्व
पूर्वजैः पुष्कचिरालस्यादिना अनाचरणो तत्तु श्रद्देरकर्तव्यत्वमात्रं तत्रादेरपितथैवेत्यन्यथासिद्धमेवेति भावः। सू
त्रेऽनुमापकस्य व्यवस्थित लाघ्यवस्थासंपृक्तमेवश्वेति हृत्पं समाप्तमनुमेयं स्यात्॥ ॥प्रयोगश्च गतार्थत्वमाह स्मृ
तीत्यादिना स्थितमिति। स्मृत्याचारविशेषे वेति वर्णकेपील्वादि विषयवर्णकेचेति शेषः। इदानीमिति। व्याकरणा रा०म० ५८
स्मृतेः प्रयोगमूलत्वात्स्व योग रूपाचारात्प्राबल्यमिति शंकानिरासात्प्रगतार्थत्वेतिभावः। नेतीति पूर्वपक्षकोटिः।

व्याकरणानुगतागमनादिशब्दाः तदननुगतागाव्यादिशब्दाः॥ प्रयोक्तव्यत्वे हेतुः साधव इति। असाधव इत्यप्रयोक्तव्यत्वे। अ
शक्तिजत्वफलमप्यर्थः स्यादिति। फलफलिभावं स्वयमेव दर्शयति मूलसंभव इति। प्रयोज्यता प्रयोज्यत्वचिंताफलचिंता
अधिकरणं तु प्रमाणाप्रमाणचिंतापरमेव अतो नाध्यायेपादे चासंगतिरित्याशयेनाह तेनेति। श्लोकोक्तहेतवस्स्व
यमेव व्याख्यास्यंते। अर्थेति। अर्थप्रत्ययाविशेषादित्यर्थः। नेति। गवादय एव साधवः प्रयोज्याः अन्ये तु गाव्यादय इति
अवगत्या नास्तीत्यर्थः। तत्र व्याकरणसाध्यनियमद्वयोक्तिपूर्वकं तन्निर्मूलत्वमुपपादयति नियमेत्यादिना। एतद्द्वयं प्र
योगः साधुत्वं चेति द्वयमित्यर्थः। यद्वा नियंतुं कर्तुमित्यर्थः। तत्राद्यनियमाशक्तिमुपपादयति तथा हीत्यादिना। स हि किमु
च्चारणं कार्यार्थमुतोच्चारणमित्ताद्दृष्टार्थं कार्यमप्यर्थधीरूपं तादृशं आद्यं नियमानर्थकं वक्ष्यत्वं गीकरोति अर्थेति। द्वि
तीयं निरस्यति नेति। दृष्टसंभवेऽदृष्टाकल्पनादिति भावः। तत्रार्थधीरूपकार्याय एव नियमोऽस्ति साधर्मसाधकमपोऽप्यर्थ
धीरूपे तु तनेति विकल्प्याय आह अर्थेति। अनर्थक इति। असाधकमपोऽर्थप्रतीतेरनिवार्यत्वादिति भावः। द्वितीयम

५९ 59 शापदूषणप्रसङ्गेति। अर्थवत्त्वादिति। गवादिभ्योऽर्थप्रत्ययाभावे तत्प्रयोगाप्रसक्त्या गवादिसाधुत्वं प्रयोगनियमहे
तुफलगवादिभ्याऽत्रेः स्यात्; सिद्धत्वादित्यर्थः। उच्चारणाभिव्यक्ताद्दृष्टार्थमित्याद्यद्वितीयमादत्ते अर्थेति। दृष्टार्थमर्थ्यमिति।
तृप्त्यर्थं भोजनादिप्रवृत्तिरनुदितहोमादिनियमवदिति भावः। दूषयति तत्रेति। मूलेति। अदृष्टार्थत्वं ज्ञाताज्ञाहितन्नियमशास्त्र
प्रणोतृत्वं तद्वेदज्ञानेन न संभवति मूलाभावादित्यर्थः। तर्हि श्रुतय एव मूलं तत्राह न चेति। अपठितानामिति। नित्यानु
मेयवेदमूलत्वनिराकरणादिति भावः। ननु गोशब्दमेव प्रयुञ्जीत न गवादिकं अपभ्रंशमेव नास्वशब्दमित्येवं प्रतिप
दं वेदवाक्यानि न कल्प्यन्ते किं त्वेकेन धर्मेण सर्वैः कोटीहस्वे कमेव वाक्यं कल्प्यत इत्याशंक्य निषेधति न चेति। यद्यपि
शब्दशब्दः सुशब्दपरो नापशब्दमिति स्वारस्यात्तथापि यथाश्रुतं दूषयति शब्दत्वादिति। वर्णत्वादित्यर्थः। तत्सामान्यम
पि नास्त्यसाधारणमित्याह न चेति। अनेन प्राच्यमतानुमानाभावे न होलाकाद्यन्यवस्थावत्प्रयोगव्यवस्थेति संगतिः। राम
स्तु चिन्तायामिदानीमपशब्दः सुशब्दपर इति शंकते साधुत्वमिति। किमिदं जातिरूपमुपाधिरूपं वेति विकल्पयति किमिति। ५९

।नाद्य इत्याह नहीति। अतो न जातिरिति शेषः। जातित्वे योगपद्वृत्तिजातित्वात्स्वलक्षणत्वापत्तेः। अत एव नानुमानादिगम्य
जातितापीति भावः। द्वितीये किं तद्वाचकत्वं वा अनादित्वं वा अहह जनकत्वं वेति विकल्प्याद्यं दूषयति वाचकत्वमित्यादि
ना। ननु शक्तिभ्रमात्स्वयोगाद्युपपत्तिस्तत्राह नहीति। अन्यथा विनिगमकाभावेन वैपरीत्यस्यापि संभवादिति भावः। ननु गवा
दौ गाव्यादिष्वाद्युत्पत्तौ गौरगो लाक्षणिको वा स्यादिति तत्राह न चेति। यद्यप्येवमपि साधुत्वापत्तिस्तथापि न त्वया वाचकानामित्युक्ति
त्वं दुर्नमात्रमिदं पर्यवसाहाधिकरणेनागतार्थत्वस्फोरणायोपन्यस्य निरस्तं। एतेन मुख्यार्थाभावेन लक्षणापात्र्यपि
मुख्यपूर्वकत्वादिति भावः। अनन्यथासिद्धत्वयोगादिविशेषेण गाव्यादीनां वाचकत्वं सिद्धमित्याह तेनेति। तत्फलमाह इति
नेति। नियन्तुमिति। गवादय एव साधव इति तदेव प्रयोज्या इति च नियन्तुमित्यर्थः। द्वितीयमाशङ्क्य दूषयति अनादित्वमि
ति। संवंधः अर्थसंकेतयितुः। तृतीयमाशङ्क्य दूषयन्नाह द्वेति। तस्य पक्षस्याप्ययोग्यतया उत्पन्नत्वान्नेते न रूपेण नियमः श
क्य इत्यर्थः। न च वेदानन्द्वान्नमित्याह वेदेति। असंभवादिति। अनन्तवेदवाक्यकल्पनानुपपत्तेरित्यर्थः। नन्वस्मदेव किंचि

६०

60

दनुगतलक्षणामक्तनेत्याह उपलक्षणोति। एवं चागत्याऽदुष्टसाधनत्वरूपसाधुत्वमेवोपलक्षणं वाच्यं तथा चादुष्टसा
धनमदुष्टार्थप्रयुञ्जीतेत्युपलक्षणस्य प्रमेयस्यैकात्मतास्वयापत्तिरित्याह तत्रेति। श्लोकोक्तनिर्मूलत्वहेतुसमर्थन
फलमाह तस्मादिति। श्लोकोक्तद्वितीयहेतुमादायोपपादयति पर इत्यादेरित्या[redacted]दिना। विगानान्नविशेषात्ताम मन्यत इ
ति अन्यथासति प्रयोजने तदभिधानापत्तेरिति भावः। न च नमिहितमविप्रयोजनपाणिनेरभिमतमन्यथा तस्यावि
चार्यकारित्वापत्तेस्तत्त्वप्रयोजनं वार्त्तिकभाष्यकारोक्तमेवेत्याशंक्य तयोरपि विरोधमाह तयोरपीति। अथवा पुनरस्त्
ज्ञानेधर्मइति साधुशब्दज्ञानेधर्मइति भाष्यकारवचनाच्छास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देनेति ज्ञानपूर्वकप्रयो
गेधर्मइति वार्त्तिककारवचनाच्च तयोरपि मिथो विगीतत्वमित्यर्थः तृतीयहेतुमादायोपपादयति निष्फलमिति। अवाप्यत इ
ति। अध्येतमिति शेषः। शंकते धर्मइति। अवाप्यत इत्यनुषंगः। एतच्छास्त्रनियमितादुष्टसाधनशब्दप्रयोगद्वारेति भावः रा.म.
। दूषयति नेत्यपीति। धर्मे विप्रमाणत्वाभावादित्यत्र हेतुः पूर्वेति। साधुस्वरूपप्रयोगनियमयोर्मूलाभावेनेत्यर्थः। एतद्दू ६०

षणामाघहेतुनैव गतार्थमित्यत आह फलान्तरमाशंक्य परिहरति । न चेति । देवा अदुह्र उक्रामं । नग्राभं चेत्सादेलोपागमवि
कारादिज्ञानेन वेदस्य रक्षा न व्याकरणस्य प्रयोजनं वेदतदर्थाभिज्ञगुरुशिष्यपरंपरयैव तत्सिद्धेः एवं सोऽपि चर्चादौ स्वर्या
यजुष्टुं निर्णयामीमांसा ग्रहो न तत्प्रयोजनं मीमांसया ऽग्न्यपदस्य स्थाने सूर्यवाचकचतुर्थ्यन्तशब्द ऊहितव्य इति सिद्धेः ताहृ १२०
शशब्दस्य सूर्यायेत्यस्य लोकत एव सिद्धेः एवं ब्राह्मणेन षडंगो वेदोऽध्येय इत्यागमोऽपि न तत्प्रयोजनं उक्तस्मृतिरूपागमे
षडंगशब्दस्याकृतिलिंगादिषट्प्रमाणाद्रूपवेदावयवपरत्वोपपत्तेः अत्र प्रयोजनशब्दः प्रयोजकपरः तत व्याकरणा
ध्ययनप्रयोजक इत्यर्थः । एवमनेकोसणपि यावदजटिलस्य व्याकरणस्याति गुरुत्वेनैकेन लक्षणेनानेकशब्दज्ञाना
त्मकं लाघवमपि प्रयोजनं न सिध्यति । एवं स्थूलं पृषतीमनड्वाहीमालभेतेत्यादौ स्थूलपृषच्छब्दे पूर्वपदप्रकृतिस्वरे
णावहुव्रीहिरेव न तु कर्मधारय इति ज्ञानमपि न तत्प्रयोजनं स्वरज्ञानायानुसरणीयात्संप्रदायादेव तत्सिद्धेरित्यर्थः । च
तुर्थहेतुं विवृणोति वेदेति । उक्तमिति । कलिना दृष्टमित्यर्थे ढक्प्रत्ययेन कालेयमाहुः । वामदेवेन दृष्टमित्यर्थे ड्यत्प्रत्यस्य

६१ येनद्यप्रत्ययेनज्ञा वामदेव्यशब्दो व्युत्पादित इत्यर्थः। ननु इति। ऽजो धर्मश्चास्माभिरद्धिर्णयोः संगमेसति वामं उन्नमं वसुध
नं ज्ञानं तच्च देवतासंबंधि ज्ञातं तेनेदं वामदेव्यं सामेत्यर्थः। पंचमं हेतुं व्याचष्टे पूर्वेति। अर्थेति। अर्थवोधायप्रयुक्ता
61 नामित्यर्थः। प्रतिज्ञातं नस्तिह्वैशब्दार्थसंबंध इति वार्त्तिक इति शेषः। तयेति। अर्थवत्वेनेत्यर्थः। पदैनैरर्थको हरिसम्मति
माहयप्योक्तमिति। ब्राह्मणकंबलशाद्वे ब्राह्मणशाद्वस्य कश्चिदर्थो नास्ति समर्थसूत्रभाष्यारे समासपदानामानर्थ
क्योक्तेः तथा देवदत्तगामभ्याजेत्यादिनाक्ये देवदत्तादिशब्दा अप्यनर्थका इत्यर्थः। कंकतेपदद्वारेणेति। पदरूपावयवद्वा
रेणेत्यर्थः। असंतेति। वाक्यमेवं ऽमन्यदेवेति स्वीकारादिति भावः। पूर्वपक्षमुपसंहरति ननु इति। गव्यादिशब्दानां वाच
कत्वाभावेपि प्रयोगस्य वक्तुःशक्तिजत्वेनार्थप्रत्ययस्य च शक्तिभ्रमेणोपपन्नेस्तेषां साधुत्वाभावात्प्रयोज्यत्वमिति सिद्धां
तपतिप्रयोगेति। गवादिवद्गाव्यादीनामपि वाचकत्वस्वीकारे बाधकमाह एकस्येति। न चाविनिगमनमित्याहाभियुक्ते रा॰म॰
ति। न च स्मृतेर्निर्मूलत्वमित्याह स्मृतेरिति। न चैवमंधपरंपरामापद्य इत्याह प्रत्यक्षेति। गवादीन्येव साधूनीति नियमे क ६१

न्तेऽप्येगवादिशब्दस्वरूपांशे प्रसक्तस्य निवेशादनादिवाचकत्वरूपसाधुतांशे च सर्वकालवृत्तित्वरूपस्यानादित्वस्य तन्त्रत्वा
त्तीनपुरूषप्रत्ययस्तत्वाद्बोधकत्वरूपवाचकत्वस्य च सर्वप्रत्ययस्तत्वादुक्तप्रसङ्गस्य सहृदन्तत्वमिति परंपराया साधुस्वरूपनि
यमः पुनरुक्त इति भावः। नन्वेवं स्वरूपनियमस्य व्याकरणसाध्यत्वेप्यदृष्टार्थप्रयोगनियमस्य न तत्साध्यता मूलाभावादि
त्यत्राह प्रयोगेति। उपसंहरति तस्मादिति। नियमद्वयस्य व्याकरणसाध्यतादित्यर्थः। प्रमाणेति। व्याकरणस्येति शेषः
। अनेन निर्मूलत्वहेतुर्निरस्तः। एतदेव प्रपंचयति ध्यन्नियमद्वयमनुवदति गवादयएवेति। धर्मायेत्यनेनार्थप्रतीतेः साधु
भोपित्वान्नियमानर्थक्यमिति निरस्तं। प्रतिपाद्यन्ते इति। तत्र स्वरूपनियमः साक्षात्प्रयोगनियमस्तु तात्पर्यगत्येति भावः।
न चानयोर्मूलाभाववदुत्साहदूषणोरिति। संभवात् वक्ष्यमाणरीत्येति भावः। प्रामाण्यमिति। व्याकरणस्येति शेषः। तत्र व्यव
हितानंतरनिर्दिष्टे प्रयोगनियमे मूलमुपपादयति तथाहीति। प्रत्याय्यते इति। विश्वसिते इत्यर्थः। तथा च व्याकरणं प्रमाणम
भियुक्तप्रणीतत्वान्मन्वादिस्मृतिवदिति प्रयोज्यमिति भावः। न च हेत्वसिद्धिरित्याह न हीति। अविश्वासहेतुर्योपानुपलं

६२ भादिति भावः। न केवलं प्रयोगनियममूलत्वे वेदेनुमानं प्रसक्तमप्याप्तीत्याह प्रसक्तमिति। किं चेति चकारार्थः अनुमानने ऽपे
क्ष्यार्थ एवकारः। वचनमिति। प्रयोगनियममूलमिति शेषः। तदेव वचनमाह त। स्मादिति। न म्लेच्छितवै न म्लेच्छितव्यं।
अपशब्दनिषेधे च साधुशब्दनियमोऽर्थात्सिद्ध्यति। अयं च निषेधः। प्रकरणाज्ज्योतिष्टोमांगमतो व्यवहारे भाषाप्रयोगाऽ
पि न दोषः महाभाष्ये सर्वस्यापशब्दनिषेधस्य क्रत्वर्थत्वोक्तेः। गाव्यादीनामपशब्दत्वं च वक्ष्यत इति भावः। आहिताग्निरिति
। अन्वाहिताग्निरित्यर्थः। ततश्चाग्न्याधानानंतरं कर्ममध्ये ऽपशब्दप्रयोगे इदं प्रायश्चित्तविधानं चेति मूलमिति शेषः। मू
लांतरमाह उतेति। उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनां। उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सु
वासा इत्यस्मिन्मंत्रे। त्वः कश्चित्पश्यन्नपि पश्यन्नपि शृण्वन्नपि तन्न शृण्वन्नपि। उशती कामयमाना। जाया पत्य इव त्वस्मै कस्मैचि
त्तन्वं तनुं विसस्रे उतो विवृणोत्येवं निंदापरेति मूलमिति शेषः। तथा च नानामूलश्रुतिबलात्प्रयोगनियमविधिः एम॰ ६२
कल्प्य इति भावः। यदभिप्रायेणाधर्मायेत्युक्तं तत्स्पष्टं तं विवृणोतीति दुष्ट इति। भोजन इति। आपुरादिफलायेत्यादिः। वि

धीयत इति। व्याकरणानुमितेन शागुरुप्रयोगानुमितेन वा। एकः शब्दः सम्यग्ज्ञातः सुष्टुप्रयुक्तः स्वर्गे लोके कामधुग्भव
तीति पक्षस्यक्षेणावाशास्त्रेणाभ्युदयाय विधीयत इत्यर्थः। तस्मात्सर्वपक्षस्य नो क्रमयुक्तमित्याह न प्रयोग इति। प्रयोगोसन्नेः
प्रयोगनियमस्य तन्नियामकव्याकरणस्य वा अशास्त्रत्वान्मूलक्षतिराहित्यादव्यवस्थेति यन्नेत्यर्थः। प्रकारान्तरे
णाप्रयोगोसन्नेः शास्त्रीयत्वमाह सत्येत्यादिना। किंचेति चार्थः। अविगीतमविप्रतिपन्नं। न तु सत्यं वदेन्नानृतं वदेदिति
शास्त्रे सत्यानृतशब्दयोरर्थविषयत्वान्न गोगाव्यादिशब्दवदनवर्जनयोरपि लाभः। अन्यथैकस्य शब्दस्याद्यर्थज्ञापत्ति रि
त्याशंक्य सत्यत्वं नाम तत्सा अबाधितार्थबोधकत्वं तच्च गोरित्यमिति शब्देऽर्थस्य गोरबाधितत्वादर्थविषयसत्यत्वं गो
शब्दस्य वाच्यप्रतिपादकत्वाच्छब्दविषयसत्यत्वमित्युभयमपि निरूक्तरूपेणैकस्यैव सत्यशब्दस्यार्थः। गाव्यत्तीत्यत्र
त्वर्थबाधेऽबाधितार्थाभावादर्थानृतत्वं। गावीशब्दस्य तत्स्वभावाच्छब्दानृतत्वमित्युभयं निरूक्तबोधकत्वाभाववत्त्वेन ए
कस्यैवानृतशब्दस्यार्थ इति। सत्यं वदेन्नानृतं वदेदित्यत्र सत्यानृतशब्दयोर्नानेकार्थज्ञापत्तिरित्यभिप्रेत्य सत्यशब्दे

६३ नविधीयमानं सत्संशब्दस्य समर्थस्यं चेति द्वेधा विभजते तच्चेति। ततः किं तत्राह तत्र यथेति। यथावस्थितेनेति। अवाधि
तेत्यर्थः॥ अर्थस्य स्वजात्याधर्मार्थत्वस्य सर्वसंप्रतिपत्तेर्दृष्टांततां दार्ष्टान्तिकमाह तथेति। यथावस्थितेत्यस्यैव व्याख्यानं अवि
63 प्लुतेति। वृत्तिमदित्यर्थः। शब्दान्तरस्याधर्मार्थत्वमपि संप्रतिपन्नार्थान्तरदृष्टान्तेनाह यथा चेति। शब्दान्तरस्वरूपं दर्शयत्य
न्यरूप इति गोरूपे वाचके स्थिते गावीरूपप्रयोग इत्यर्थः। उपसंहरति इतिनेति। अत्रानन्तरशब्दकल्पनामापादितां वारयति
द्वाभ्यामिति। न चैकेनेतरसिद्धेरुभयवैयर्थ्यं शंक्यं साधुप्रयोगनियमं फलस्याभ्युदयस्यानिच्छादशायामसाधुप्रयोगवा
रणाय तन्निषेधस्याभ्युदयफलार्थत्वबोधनाय साधुनियमविधानस्य चावश्यकत्वादिति भावः। ननु सत्त्वं वदेदित्यादिशा
स्त्रान्तरवदनविधिनिषेधप्रतीतेः कुतः साध्वसाधुत्वोपलक्षितविधिनिषेधावसिद्धिस्तत्राह साधुत्वेति। उपलक्षणतोऽनि
विधेयनिषेध्यसंग्राहकेऽत्यर्थः। न च साधुत्वासाधुत्वे दुर्वचे इत्याह अनादीति। अत्र वाचकत्वं ज्ञापकत्वं विवक्षितं। तच्च राम
गाव्यादौ गतमतो नादीति। अनादित्वमात्रं तु क्रमादित्वो भेषु गतमतो वाचकत्वमिति। यदि तु वाचकत्वं क्वचिच्छक्तत्वं तदा ६३

नादित्वं नदीयं शक्यभावादेव गाव्यादिवारणात्। न च देववृत्त्यादिपदेष्वतिव्याप्तिः नामकरणशास्त्रात्तेषां शक्तिस्वीकारेण ल
क्षणत्वात्। पूर्वपक्षमुपक्रमनूद्य दूषयति यत्त्वित्यादिना। वाचकत्वं शक्तं किं शक्तत्वप्रज्ञापकत्वं वा नाद्यः अवाचकत्वेप्यनन्त एव
च गोरीलक्षणायोऽसंभवे पि गोशब्दे प्रयोक्तव्येऽशक्ता गावीप्रयोगस्य गोशब्दाच्छक्तिज्ञोयमिति ज्ञानं ततस्ततोऽर्थप्रत्ययस्य
च संभवादित्याह यद्यपीति। अमीषां गाव्यादीनां। वाचकेति। वक्तृकरणपाटवजन्मतयेत्यर्थः। मूलेति। गवादीत्यर्थः। तर्हि
कथं बालानां तेषु वाचकत्वव्यवहार इत्यत्राह अशक्तिजत्वेति। बालानुसरित्सवः। तत्रैवेति। गावीमामानयेति स्खलत्यानीते
गवि गावीशब्दे चेत्यर्थः। द्वितीये प्रज्ञापकत्वमात्रं न साधुत्वं किं त्वनादित्वविशेषितं तच्च न गाव्यादौ सिद्धं तस्य शक्तिजत्वेनाप्युप
पन्नेरित्याह इत्थमेवमपीति। इति हेतो। सर्वेषां गोगाव्यादीनां। अविच्छिन्नेति। अनादिबोधकत्वमित्यर्थः। नन्वशक्तिजत्वं वा कल्प्यं
शक्तत्वरूपवाचकत्वं वा कल्प्यं कोऽत्र विशेषस्तत्राह संभवतीति। सति सम्भवेऽयं दृष्टत्वादशक्तिजत्वकल्पनैव लघीयसी अ
न्यथा शब्दद्वयस्यापि शक्तिकल्पना गोरवादिति भावः। दोषान्तरमाह प्रयोगेति। विकल्पापत्तेर्हेतुमाह वाच्येति। तमेवोपपाद

दयन्ति स्यास्त्वेति। कर्म। कर्मकारकं अयं कर्मकरणभावः वाच्यवाचकभावइतियावत्। तथा च गावीशब्दप्रयोगे गोशब्दस्य
स्वीकृतवाचकत्वत्यागः अस्वीकृतवाचकत्वस्वीकारइ गोशब्दे द्वौ दोषौ पुनर्गोशब्दप्रयोगे त्यक्तवाचकत्वस्वीकारः स्वीकृता
वाचकत्वत्यागइतितत्रैव द्वौ दोषाविति गोशब्दे दोषचतुष्टयं। एवं गावीशब्देपी त्यष्टदोषापत्तिरिति भावः। प्रयोगनियमेमू
लमुपपाद्य साधुत्वरूपनियमेप्युपपादयति। वाचकरूपेति। श्लोकव्याख्यानेनैव व्याख्यातप्रायं इदानीं द्वितीयं पूर्वपक्ष
हेतुं निरस्यति न च विगानादिति। स्मृत्योर्मिथो विरोधेपि विरूद्धकृतिद्वयानुमानसंभवादुभयप्रामाण्योपपत्तेरिति भावः। तृ
तीयहेतुं निरस्यति फलमिति। धर्माधर्मप्राप्तिपरिहारार्थं यावुपादानपरित्यागौ तदुपयोगि शब्दापशब्दज्ञानं फलमित्यर्थः।
अन्याच प फलमाह रक्षेति। व्याकरणादपि रक्षादेः संभवात् षडङ्गशब्दस्य प्रसिद्धेर्वेदशब्दसमभिव्याहाराच्च शिक्षाद्यंगपर
एवेतिभावः। चतुर्थहेतुमंशतो दूषयति वेदेति। पंचममपि तथैव दूषयति एवमिति॥ ॥प्रयो॥ लोकवेदाधिकरणस्या राम०
कृत्स्नाधिकरणोपोद्घातत्वेन व्याकरणाधिकरणेनासंगतत्वादाकृत्स्नाधिकरणस्यैव तत्संगतिमाह व्याकरणमिति। आकृ ६४

त्तिर्ज्ञप्तिः। लोकवेदाधिकरणस्याकृत्यधिकरणोपोद्घातत्वं दर्शयति तत्रेत्यादीति। अन्यत्वे लौकिकविषयमिदमधिक-
रणमुत वैदिकविषयमिति विकल्प्याद्येऽनारंभमुपपादयति तथा हीति। अनर्थकं वेदार्थानुष्ठानानुपयोगादिति भावः
।द्वितीयेऽर्थवत्वेप्यनारंभमुपपादयति वैदिके इति। पदपदार्थसंबंधग्रहस्योत्तमवृद्धादिव्यवहाराधीनत्वात्तदभावेनुपपत्ते-
रिति भावः। अनन्यत्वे आरंभसाफल्यमाह अनन्यत्व इति। तत्र लोके। पदार्थानामिति। पदानामर्थानां चेत्यर्थः। अन्यान-
न्यत्वे अन्यत्वानन्यत्वे। अस्मिन्विचारे पूर्वपक्षमाह तत्रसत्यपीति। स्वरेति। वैदिकेषु नियतस्वरः। देवासइत्यादौ वर्णागम-
श्छांदसः। त्मने इत्यादौ आत्मने इत्यस्याकारलोपः। उद्ग्राभं च निग्राभं चेत्यादौ हकारस्य भकारो विकारः। लोके तूक्तनियतस्वरा-
दीनां विपर्ययः। अध्यायो वेदेऽध्ययनतिथिनियमः। लोके नध्यायस्तदनियमः। आदिशब्देनोपनीतत्रयोऽन्यत्र तदभावादिः।
यद्यपि पाणिनिना भाषायामपि स्वरोनुशिष्टस्तथापि शिष्टैस्तदनादरात्तदनावश्यक इति भावः। व्यपदेशेति। वैदिकत्व लौकि-
कत्वव्यपदेशोत्यर्थः। त्वर्विति। अलौकिके इत्यादिः। नन्वेवं पदभेदेप्यर्थभेदः कुतस्तत्राहार्थेति। यद्यपि पदभेदमात्रेणानारंभ

६५ 65 सिद्धिस्तथापि तद्वदर्थभेदोपि तत्साधक इति सोप्युक्तः। पसम्यलादिति। संज्ञाधिकरणमाये न शब्दभेदेऽर्थभेदश्चौत्सर्गिक
इति भावः। एकसाप्यर्थभेदो वशम्यत इत्याह उन्नाना इति। येउन्नाना वदं तिते गोशब्दवाच्या इत्यर्थः। ततश्च लौकिकवैदिकगो
शब्दयोर्वाच्यभेदे देवानामाजानसिद्धवैदिकशब्दैर्व्यवहारोपपन्न इति भावः। सिद्धांतिनोप्यत्रै संप्रतिपत्तिरस्तीत्याह आ
म्नवालेति। अन्य इति वेदेऽर्थ इति शेषः। ननु वर्णौकोपि स्वरादिभेदात्स्वरभेदः सिद्धांतिसंमत इति शंकते ननु चेति। तत्र सका
रिकं पठति पदेति। पदभेदेत्यर्थः। क्रमादित्रयभेदं कृतः पदभेदः परिहारग्रंथे स्फुटः। वाक्यं पदानां तत्समभिव्याहारः यथा उ
भुक्तः पचते इत्यत्र पचत इत्यस्मात्तं पचते दक्षिणां देहीत्यत्रयात्तं नाम पदं पदांतरेणापादानात्। एकतिरत्रसामानाधिक
रणं यथा उद्भिदा यजेतेत्यत्रोद्भिदं कर्मनामयजेत्तृतीयासामानाधिकरण्ये त्वखनित्रं यद्वाम्नाति तृतीयादि एकतिः उद्भि
देति तृतीयाश्रुति बलाद्भावनाकरणीभूतकर्मपरमुद्भिदं त्वखनित्रादिपरमित्यर्थविशेषावच्छिन्नपदभेदस्तृतीयाश्रु रा म०
त्यवसेयः स्मृति व्याकरणं अध्यस्वामित्वत्रदुक्तोस्त्विग तिहोत्रोरित्यस्यमध्यमपुरुषैकवचनं न तु नाम। अर्हींगीकारेणाप ६५

रिहरतिसत्त्वमिति। अत्रा कृतमंशमाह योर्थेति। नाहृशधर्मानेवाह यथेत्यादिना। किंतु परपर्यायप्रातिपदिकांतोदात्तस्वरः
प्रकृतिस्वरः पूर्वपदस्य प्रकृतिस्वरत्वे स्थूलपृषतीमित्यादौ बहुव्रीह्यर्थो नावगम्यते बहुव्रीहौ प्रकृत्या पूर्वपदमिति स्मरणा
त्। समासस्येति सूत्रेण समासांतोदात्तत्वे विहिते तत्रैव व्यस्तार्थवृत्तित्वमवगम्यत इत्यर्थः। अवसाय इति। लोकतत्त्व इत्यनुषंगः
अत्र नंगीकृतमंशमाह नैवमिति। अर्थउपाधिः। प्रयोजकोपस्थितः अर्थविशेषव्याप्य इति यावत्। तथाविधस्य धर्मस्य भेद
इत्यर्थः। ननु मिपतस्त्वादिरेव तादृशो धर्मस्तत्राह यदीति। तस्य तथात्वे प्रमाणाभावान्न द्वंद्वे नार्थोपाधिकभेद इत्यर्थः
। नन्वर्थ इतिस्सोपाधिकधर्मभेदाभावेपि धर्ममात्रभेदात्सद्भेदः किं न स्यात्तत्राह यद्यत इति। एवं च सति देवास इत्यादौ न
पदभेद इत्याह एवमिति। नन्वर्थभेदाभावात्सद्भेदाभाववदर्थैक्यानवगमात्तद्भेदोपि न स्यादित्यत आह किंचिदिति।
स्वरूपमात्रादि प्राद्रत्याहित्याद्युक्तं भेदं निरस्यति सत्यपीति। नास्माभिरपि सर्वेषाममभेदः साध्यत इत्यर्थः। अभेदे प्रत्यभिज्ञाव
न्नानांतरमाह यदैकदेति। यदैकोपत्त्वेव तदर्थावगमः संभवत्यन्यथाव्यवहारानुपपत्तिस्तदाभावेन न संभवेदित्यर्थः। यदा

६६

66

पदैकासिद्धावर्थैकमपि सिद्धमित्याह पदैका इति। तस्य लौकिकपदवाच्यस्यैवार्थस्य वैदिकपदादवगमादित्यर्थः।
अन्येति। पउत्तानां वहंतीत्यादिरूप गोशब्दवाच्यत्वविधानमप्राक्तमुक्तानवहनस्याप्रसिद्धत्वात् किंतु दुर्घटक्रियाकारि
देवगवजातीयत्वेन प्रशस्तो इति तत्कथं तेगावो दक्षिणा दानापेत्यर्थः। नन्वश्ववालादिपदानामर्थभेदो दृष्टस्तत्रा
हाश्ववालेति। पत्रार्थवादादिगमकमस्ति तत्रैवार्थभेदो नान्यत्रेत्यर्थः॥ ॥उपोद्घातो पदर्थः इतस्तदिदानीमा
रभते एवं सिद्ध इति। अन्ये त्विति। नियोगे न विकल्पे न हेतुवा सह समुच्चिते। संबंधः समुदायो वा विशिष्टा वैकपेत्त
देत्येषु पक्षीमुपाक्षिप्य गोरित्युच्यते समवत्तूनि प्रतिभांति नः। जातिर्व्यक्तिश्च संबंधः समूहो लिंगकारके। संख्यो
चसमभीतेषामसेपपक्षाह्वयोर्हयोरित्यादिनापेवहवः पक्षा वार्तिके उपन्यस्ता इत्यर्थः। प्रयोगेति। प्रयोगा अवघाताद्य
नुष्ठानानि तेषां चोदनाविषयः तेषांभावात्ससत्वाद्व्यक्तिछेवतत्संभवादित्यर्थः। जातौ तदसंभवमाह नहीति। व्यवहारोव
हननादिः। दोषांतरमाह लिंगेति प्रयोगचोदनाग्रहणं प्रतिषेधस्याप्युपलक्षणमित्याशयेन व्याचष्टे ब्रीहीनिति।

ए.म.
६६

जातावुक्तदोषो नात्रेति वदन् द्वितीयं श्लोकं व्याचष्टे एवं चेत्सादिना अलिंगत्वाच्चिति। इदमापाततः। तत्र केशव

ती स्त्री स्याद्भो मशः पुरुषः स्यात् इत्युक्तलक्षणस्य स्त्रीत्वादेर्वृक्षादिव्यक्तावप्यसंभवात्सत्त्वरजस्तमोगुणानामाविर्भा

वलक्षणलिंगस्य जातावपि संभवात्। असंख्यत्वादिति। द्वित्वादिसंख्याया द्रसत्वेस्वतोऽसंभवादित्यर्थः। ननु गोप

दस्य गोत्वजातिविशिष्टवाचित्वाच्छुक्लपदस्य शौक्ल्यगुणविशिष्टवाचित्वाद्विशेषणाभेदे च विशिष्टभेदान्नानयोरे

कार्थत्वमित्याशंक्याह जातिगुणेति। न विशेषणाभेदेपि विशिष्टभेदः गोर्न शुक्ल इति भेदाप्रतीतेरिति भावः। एवमिति। देव

त्तपदे संज्ञात्वात् द्रव्यवाचीति भावः। ननु केवलव्यक्तिशक्तिपक्षे व्यक्तीनामानंत्याद्यस्यां व्यक्तौ शक्तिग्रहस्तस्यामेव प्रयोगः

स्यान्नान्यत्रेति शंकते कथमिति। गोशब्दो गोत्वोपलक्षितव्यक्तिशक्त इत्येवं शक्तिग्रहात्तदुपलक्षितव्यक्त्यन्तरेऽपि प्रयो

गः संभवतीति परिहरति सामान्यस्येति। या एवमाकृतिका गोत्वजातिविशिष्टास्ता गोः गोशब्दवाच्याः एवमन्यत्रापीत्यर्थः

। न चोपलक्षणत्वमात्रेणाज्ञातेऽभिधेयत्वप्रसंग इत्याह यथा चेति। व्यक्त्यानंत्यकृतशक्तिनानात्वस्यापि न प्रसक्तिरूप

६७

67

लक्षणोक्तेः तथाज्ञैयक्यादित्याह एवेति। आहृतेति विशिष्टेऽस्तु उपलक्षितत्वाद्विग्रहः। अनन्यथा शुद्धा विशिष्टा वेत्युपसंहा
रसंगतेः। शुद्धा उपलक्षिते इत्यर्थः। विशिष्टा वेति प्राचीनतार्किकमतेनाशाप्रयोक्तं। सिद्धांतमाह नेतदिति। व्यक्त्यभिधा
नेवाधकान्याह आनंत्येति। अभावतद्दृति। न व्यक्तिः शब्दार्थ इति शेषः। जात्यभिधाने साधकान्याहान्वयेति। जातिपक्षो
क्तदोषानुद्धृत्य इतिव्यक्त्यादृत्येरिति। वस्तेकांत्यास्युपगमेपि नानुपपत्तिरित्याह लक्षणेति। स्वयमेव शक्तौ कान्याचक्षा
णन्त त्राय्यं हेतुं विवृणोति नहीति। अनंतव्यक्त्युपस्थित्यसंभवादिति भावः। द्वितीयं व्याचष्टे व्यभिचारादिति। व्यभिचा
रमेवाह नियमेति। संबंधस्याभिधायकाभिधेयभावरूपस्य गोशब्देन सास्नादिमतीसर्वा व्यक्तिरभिधेये त्यभिधानक्रि
याद्वारकनियमरूपत्वाद्व्यवहारदशायां च सर्वव्यक्त्यनभिधाने नियमबाधेनोक्तसंबंधासिद्धेरित्यर्थः। अथवा
शब्दार्थसंबंधस्य अयमेवास्य शब्दस्यार्थ इति नियतरूपत्वात्तस्य चैकस्यामेव व्यक्तौ संभवाद्व्यक्त्यंतरसाधार एम.
णे नियतशब्दार्थसंबंधासंभवादित्यर्थः। महत्त्वगौरवमिति तृतीयं हेतुं व्याचष्टे आनंत्यादेति। न नूपलक्षणो ६७

कान्नशक्तानंत्तमित्युक्तं तत्राह जातीति। तदेवोपपादयति व्युत्पत्तिरिति। व्युत्पत्तिः शक्तिग्रहः अभिधानमुपस्थि
तिः। व्याप्तिस्विकेनेति। तद्व्यक्तिरूपेणेत्यर्थः। शक्तिग्रहोपायमात्रमुपलक्षणं न त्वभिधेयभेदप्रयुक्तं शक्तिभेदं निवा
रयतीतिभावः। तदेव दृष्टान्तेन साधयति तद्यथेति। अक्षत्रयं देवनविभीतकस्थावयवरूपं। अपवरकं गर्भगृहं
। शक्तानेकत्वेऽपि तदेव शक्तेरनेकशाब्दितविशिष्टविषयकत्वार्थपर्यवसायित्वेन व्याचष्टे अपि चेत्यादिना। अ
यपदेऽयं विशिष्टबोधानर्हा अविशिष्टा निर्विकल्परूपा न तु प्रयेनरूपेण शक्तिग्रहस्तेनैव रूपेणोपस्थितिरपी
तिनोक्तदोषइत्याशयेन शंकते अथेति। अप्यर्थ एवकारः। तर्हि विशिष्टशक्तित्वादापत्तिरिति दूषयति तत्रइति। प्र
थममिति। नागृहीतविशेषणेतिन्यायादितिभावः। विशिष्टमिधानमेवेति। ततश्चत्वदुक्तरीत्यैव विशिष्टशक्तिर
पिस्यादितिभावः। अस्तुकोदोषस्तत्राह विशिष्टाभिधानेचेति। पूर्वतरमिति। उक्तन्यायादेवेतिभावः। नन्वेति। अ
नन्यलभ्यस्यैव वृद्धार्थबोधकेष्वलक्षणालभ्यत्वान्न तत्र शक्तिः कल्प्येत्यर्थः। चतुर्थं व्याचष्टे किंचेति। संशयइति। गा

६८

68

मानयेत्युक्ते कां वा गामित्याकांक्षादर्शनादिति भावः। ननु शाब्दजन्यनिर्विकल्पकोपस्थितिरपि निश्चय एव संशयस्यावि
रुद्धकारुकत्वादन्यथा गोत्वोपस्थितिरपि संशयः स्यादिति शंकते नन्विति। वस्तुनः सामान्यविशेषरूपेणाद्वैविध्ये स
ति तत्र विशेषपर्युदासे सामान्यमेवपरिशिष्यत इति तदेव शाब्दार्थः पर्यवस्यति तदुपस्थितेर्निर्विकल्पकत्वेपि कांक्षि
छेवविकं गोत्वमित्याकांक्षायाश्च दर्शनात्संशयत्वमित्यभिप्रेत्य विकल्पयति किमिदमिति। ननु गामानयेत्युक्ते गो
त्वोपस्थितावपि कां गामित्याकांक्षायाश्च विशेषद्दसाशंका गोशाब्दार्थस्य गोत्वस्य निश्चयेपि नस्यात्तिसुपर्यवसानाद्यक्ति
संशयप्रयुक्तेयमाकांक्षा न शाब्दजन्येत्यभिप्रेत्य समर्थयमं व्याचष्टे प्रथमं चेति। तथा च प्रथमप्रतीतादेव शाब्दार्थात्सार्थाकांक्षाशां
न्तेनेच प्रतीतस्यार्थत्वकल्पनेत्यर्थः। पदं व्याचष्टे विचित्राश्चेति। खंडः खंडितावयवः मुंडः शृंग — हीनः। एवं प्रथम
श्लोकं व्याख्याय द्वितीयश्लोकगतं द्वितीयं हेतुं चित्रबुद्धिप्रतिद्वंद्वितया बुद्धिस्थत्वात्प्रथमं विवृणोति। एकरूपेति। स्थायं वि न्या०
वृणोति अन्वयेति। सति गोत्वे गोशब्दप्रयोगादसत्यप्रयोगाद्येत्यर्थः। जातिशक्तावुक्तदोषानुद्धरन्नेव विशेषश्लोकं व्या ६८

चेष्टाव्यवहारेत्यादिना। नहीति। अत्यंतभेदेऽत्यंताभेदे च खंडो गौर्मुंडो गौरित्यादिवत्पर्यायशब्दवत्सामानाधिकरण्यादर्शना
६९ द्भेदाभेदरूपतादात्म्यमेव जात्यर्थ इति भावः। ननु भेदे जातिरेव शब्दार्थो न व्यक्तिरिति विप्रतिपत्तिं तत्राह तत्र सामान्यमि
ति। अभिन्नरूपेणाशब्दगम्यतानभिन्नरूपेणेत्यर्थः। एवं च सामान्यरूपेणाशब्दार्थता विशेषरूपेण व्यवहारांगता चोपपद्यत
69 इत्याह पक्षेति। साधयितुमिति विशेषरूपेणेति शेषः। तादात्म्ये नैव दोषांतरमपि परिहृतमित्याह लिंगेति। भेदाभेदयोरे
कत्र विरोध इत्याशंक्याह परस्परेति। लक्षणेति। जातेः स्वतो विलक्षणत्वेन व्यक्तिमनपेक्ष्य प्रतीतेः पश्चाल्लक्षणया व्य
क्तिप्रतीतिरिति भावः। लक्षणापि न सर्वत्रेत्याह प्रवृत्तेति। अधिकरणत्वमुपश्लेषादिलक्षणं द्रव्यस्यैव न जातेः। तथा द्रव्यो
देश्यत्वविशिष्टद्रव्यप्रतिग्रहीतृत्वलक्षणं संप्रदानत्वमपि नाचेतनजातेरिति भावः। सूत्रे अननादि विधिसत्ताद्व्यक्तिरेवार्थः
गां पश्येदित्यादौ जातिरप्यर्थः किं नेत्यत आह अर्थक्रत्वमिति। व्याप्यमिति शेषः। कथं तर्हि जातिधीस्तत्राह अविभागादिति॥ ए म·
॥ ॥इति श्रीचंपकनाथसूनोः शास्त्रदीपिकाप्रकाशे प्रथमस्याध्यायस्य तृतीयः पादः॥ ॥श्री॥ श्री॥ ६९

६५

मीमांसा

पत्रे ६५